# हिमगिरि दशशती



S
954
Sh 24 H

S
954
Sh 24 H

मुद्रक-प्रकाशक

त प्रेस नूरपुर (ह० प्र०)

# शुभाशंसा

आपकी रचनायें देखकर बहुत प्रसन्नता हुई—स्वा० अखण्डानन्द सरस्वती जी के शिष्य होने के नाते भी आप हमारे परिवार के सदस्य हैं।

—हमारा शुभाशीर्वाद—

जगद्गुरु शंकराचार्य कांची पीठ
जयेन्द्र सरस्वती जी महाराज
वर्तमान नूरपुर
२६–४–८६

# अपनी बात

१९८८ से १९८९ के पूर्वार्द्ध अर्थात् अप्रैल १९८९ तक चार मौलिक रचनायें फूट पड़ी जो अप्रत्याशित स्फोट थे—

दादा कुण्डली दर्शन—१९८८ में छपा, गीता कुण्डली दर्पण—१९८८ जौलाई के अन्तिम सप्ताह में ३६ घण्टों में फूट पड़ा—.

पश्चात् 'पहाड़ी कुण्डली शतक' बना पुनश्च संस्कृत में 'हिमगिरि दशशती' से ऊपर सरकती गई- 'कल्पद्रुम' की रचनायें अलग से बनीं हमारे जीवन के आठवें दशक का प्रारंभ इन्हीं रचनाओं से हुआ। आगे क्या होने वाला है—ऊपर वाला जाने। सभी रचनाओं का प्रकाशन अभी तो असंभव है।

| | | |
|---|---|---|
| १. | प्रेम प्रकाश — | अनुपयति आश्रम वृन्दावन |
| २. | आध्यात्मिक सृष्टि की रचना — | ,, |
| ३. | रसचन्द्रिका — | ,, |
| ४. | गीता डोगरी — | शक्ति प्रेस नूरपुर |
| ५. | गीता पहाड़ी — | अप्रकाशित |
| ६. | वात्स्यायन कामसूत्र डोगरी | अप्रकाशित |
| ७. | नारक डुग्गरे दा<br>कविता नूरपुरे दी — | शक्ति प्रेस नूरपुर |
| ८. | सुबोध संस्कृत व्याकरण — | ,, |
| ९. | गीत गोविन्द पहाड़ी — | ,, |
| १०. | बदली की कहानी<br>कविता की जुबानी — | ,, |
| ११. | वजीर रामसिंह पठाणिया —<br>(संस्कृत) — | साधु आश्रम<br>होश्यार पुर |
| १२. | सती नील देवी (संस्कृत) — | ,, |
| १३. | भूचाल ,, — | ,, |
| १४. | नाटक जगत्सिंह ,, — | ,, |
| १५. | पहाड़ी कथानक — १५ — | टंपित |
| १६. | पहाड़ी गीता कथा — | टंपित |
| १७. | दादा कुण्डली दर्शन — | शक्ति प्रेस नूरपुर |
| १८. | गीता कुण्डली दर्पण — | अप्रकाशित |
| १९. | हिमगिरि सप्तशती — | प्रकाशित |
| २०. | कल्पद्रुम पाक्षिक — | शक्ति प्रेस नूरपुर |
| २१. | कुछ उर्दू रचनायें — | कल्पद्रुम से |

# मंगल पद्यम्

हैमे निर्झरी–निर्झरी स्रव जले–शीतोष्ण तोये ह्रदे–

मन्दं मन्द मुदार वर्षण परै मेघै समाच्छादिते–

राज्ञां पूर्वमुपासिते गिरितटे सत् सैन्य सेपान्विते–

स्थाने नूरपुरे हुतात्म भारते जाता सुधा माधुरी–

दादा नूरपुरी

वैशाख २०४६

अप्रैल १९८९

वसन्ते

Himgiri dashshati

# हिमगिरि दशशती



—रचना—

**चक्रधारी शास्त्री** Chakradhara Shastri

साहित्याचार्य :

दादा नूरपुरी

कल्पम सम्पादक :

नूरपुर हि० प्र०

हिमगिरि दशशती

सर्वाधिकार सुरक्षित

Library IIAS, Shimla
S 954 Sh 24 H
G 1262

S
954
Sh 24 H

मूल्य २० रुपये

प्रथम बार

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. G-1262
Date 29.4.92

मुद्रक प्रकाशक

शक्ति प्रेस नूरपुर

वि० २०४६—१९८९

# —संसूचिका—


| | | पृष्ठ संख्या |
|---|---|---|
| १. | हिम मधुरम् | १ |
| २. | भारत दर्शनम् | ३ |
| ३. | हिमाचल दर्शनम् | ४ |
| ४. | शिमला नगरी | ८ |
| ५. | सुभाष चन्द्रोदय प्रशस्तिः | १२ |
| ६. | चम्बा नगरी | १३ |
| ७. | ताप तप्तो हिमाचलः | १५ |
| ८. | वर्षा प्रलयः | १६ |
| ९. | दृष्टामया मुंबई | १८ |
| १०. | जम्बू द्वीपः | २१ |
| ११. | कुंभ महापर्व | २५ |
| १२. | आकाश वाणी दूरदर्शनम् च | २८ |
| १३. | वी० वी० सी० किं किं विदधाति | ३० |
| १४. | ब्रज भूम्यामिह किं किं दृष्टम् | ३१ |
| १५. | कृतं प्रयाणं ह्यस्मिन् धरातले | ३४ |
| १६. | कृष्ण चेतना संस्थापकः प्रभुपादः | ३६ |
| १७. | ब्रज गन्धा | ३९ |
| १८. | भारते-हिमाचलः | ४० |
| १९. | देशः कुत्र गमिष्यति | ४२ |
| २०. | संस्कृतम् | ४४ |
| २१. | भारतीया सेना | ४७ |
| २२. | शान्ति कुंजम् | ४९ |

पृष्ठ संख्या


| | | |
|---|---|---|
| २३. | हुतात्मा वजीर रामसिंह पठाणिया | ५३ |
| २४. | भूचालः | ५६ |
| २५. | मीरापूजिता श्रीकृष्णमूर्तिः | ५७ |
| २६. | देव भूमिर्हिमाचलः | ५८ |
| २७. | सती नील देवी | ६० |
| २८. | संवित् | ६३ |
| २९. | हिम धरा | ६६ |
| ३०. | तोमराणां जयोत्सवः | ६८ |
| ३१. | पंचायती राज्य व्यवस्था | ७४ |
| ३२ | दिव्यं सरः | ७७ |
| ३३. | लिखामि कि | ७८ |
| ३४. | भारतीयो वाङ्मयः | ७९ |
| ३५. | ज्यौतिषम् | ८३ |
| ३६. | चिकित्सा | ८५ |
| ३७. | अष्टांगो योगः | ८७ |
| ३८. | भारतीया न्याय व्यवस्था | ८९ |
| ३९. | रक्त पातः | ९१ |
| ४०. | नारी दुरवस्था | ९३ |
| ४१. | अद्य किम् | ९५ |
| ४२. | गुरु वन्दना | ९७ |
| ४३. | हिमगिरि स्तवः | ९८ |
| ४४. | हिमगिरि दशकशती समापनम् | ९९ |

# हिम मधुरम्

हिमिका मधुरा
चम्बा मधुरा
कुल्लू मधुरो
जाखू मधुरो
पांगी मधुरा
देवी दुर्गा
काली मधुरा
शंभुर्मधुरो
ब्रह्मा मधुरो
भाषा मधुरा
चलितं मधुरं
गमितं मधुरम्
लिखितं मधुरम्
कृत्यं मधुरम्
लास्यं मधुरम्
शूराः मधुराः
धीराः मधुराः
कन्या मधुरा
वृद्धाः मधुराः
युवकाः मधुरा
अमृतं मधुरम्
शुक सारिकयोः
कुंजू मधुरो
दृश्यं मधुरं
कविता मधुरा
दादा मधुरो

शिमला मधुरा
रावी मधुरा
मण्डी मधुरा
म्हासू मधुरो
ऊना मधुरा
नयना मधुरा
ज्वाला मधुरा
विष्णुर्म मधुरो
अम्बा मधुरा
वेषो मधुनो
ललितं मधुरम्
हसितं मधुरम्
वृत्तं मधुरम्
नृत्यं मधुरम्
हास्यं मधुरम्
वीराः मधुराः
सैन्याः मधुराः
वन्या मधुरा
तरुणी मधुरा
बाला मधुराः
हाला मधुरा
वचनं मधुरम्
मुजू मधुरो
धाराः मधुराः
रचना मधुरा
दादी मधुरा

व्यासा मधुरा
विप्राः मधुराः
वणिजः मधुराः
नारी मधुरा
स्वामी मधुरो
सुमनः मधुरम्
शाखा मधुरा
सिंहाः मधुराः
कवयः मधुराः
हरिणाः मधुराः
आलू मधुरो
आम्रं मधुरं
किन्नू मधुरो
गद्दी मधुरो
हिम मण्पलके
शय्या मधुरा
रमणी मधुरा
ढक्की मधुरा
गद्दी जात्या
चोला मधुरा
गोरी मधुरा
मदिरा मधुरा
भक्तं मधुरम्
दुग्धं मधुरम्
चलितं चलितं
सूक्तं मधुरम्
हिम मण्डलके

चक्की मधुरा
भूपाः मधुराः
शूद्राः मधुराः
शिशवो मधुरा
दासः मधुरः
कुसुमं मधुरम्
वृक्षाः मधुराः
ऋक्षा मधुराः
कवयः मधुराः
हरिणी मधुरा
भालू मधुरो
सेवः मधुरः
नींबू मधुरो
गुजरी मधुरा
सर्वं मधुरम्
शयनं मधुरम्
रमणं मधुरम्
दुर्गं मधुरम्
चलनं मधुरम
डोरा मधुरा
गमनं मधुरम्
मधरा मधुरा
भ्रक्तं मधुरम्
तक्रं मधुरम्
चक्रं मधुरम्
उक्तं मधुरम्
सर्वं मधुरम्

# भारत दर्शनम्

उत्तरे हिमनदा:
गांगेयं यामुनं
पावनं-शीतलं
सरन्ति स्वच्छंमय
स्नान्ति-अवगाहन्ति
मानवा: शैलजा:

काननं-रम्यकं
चित्रकै र्रचितम्
पश्चिमे द्वारिका
कूजन्ति सारिका:
दक्षिणे वेङ्कटम्
मोचयति सङ्कटम्

मेघस्य दूतिका
चित्राणां तूलिका
वासन्ती होलिका
क्वचिदातंकदा
भीषणा-त्रासदी
राक्षसै: रंजिता
रुधिराप्लुता मही
बालो न बालिका
वृद्धो जरायुत:
दुष्टै र्न वंचित:
भारतं-भयरतम्
जायतेऽहर्निशम्

पूर्वे गीतांजलि
मधुरा रसावलि:
मध्यमे भारतम्
विश्वे मेवारतम्
कुत्रचिद् धर्मिता
कर्मण्या-कर्मिता

सौष्ठवा-नायिका
गायन्ति-गायिका:
कलानां-निकेतनम्
काव्य रस-सेचनम्
क्वचिद भिसारिका:

जन मनो कम्पितम्
वैभवं लुण्ठतम्
विधेरिह विडम्बना
शान्तये कामना

× × ×

# हिमाचल दर्शनम्

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजा
पूर्वापरौ तोमनिद्यी वगाह्य
स्थित: पृथिव्या इव मानदण्ड:

[कालिदास:]

× × × ×

१. अद्यापि हैमाचल शैल भूमौ
वहन्ति नद्य: सरित: संरासि
गौर्य: सुनार्य: गौरा: युवान:
हरन्ति सौम्या: सुमन: मनांसि

२. बौद्धा: विहारा: गुम्फाश्च शुभ्रा:
पठन्ति बौद्धा: मणि पद्म, गीतम्
मद्दीं द्विजात्या हिम मण्डलेऽस्मिन्
मधु–धार–मिन्द्रां दुग्धं प्रवीतम्।

३. स्तनेषु लग्ना: शिशवोऽज वृन्दे
लुण्ठन्ति हैमाचल हेम भूमौ
नृत्यन्ति गायन्ति च गीतकानि
शिवा-—शिवा—शुंभु—-समन्वितानि

४. क्वचित् क्वचित् काव्य कला प्रवीणा:
गायन्ति काव्यं गिरिराज वृत्तम्
चित्राणि निर्माय क्वचित् विचित्रा:
चित्रावली राग रसे विलीना।

५. हिमाचलेऽस्मिन् चम्बा नगर्यां—
याऽऽसीत् पुरा क्षत्रिय राजधानी—
तस्योत्तरस्यां दिशि वासमिच्छन्—
कैलाश भूमौ सशिवा भवानी।

६. त्रिगर्त्त भूमौ खलु वैद्यनाथः
चामुण्डया साक मथः शयानः
वज्रेश्वरीं—ज्वालावंती—त्रिमूर्त्ति—
नयनाभिरामां खलु ध्यायमानः।

७. रावी शतद्रू—सुविपाशयाकित.—
शान्तः प्रदेशोऽय मुदारचिन्तकः
न यत्र चौरः न शठः न दुर्भगः—
सर्वे हि सन्तः सुविचार संयुताः।

८. यायावराः गुर्जर—गुर्जरी गणाः—
भ्रमन्त्यहोरात्र मितस्ततः भृशम्
दुग्धं च तक्रं दधि माण्ड संयुतं—
शिरस्युपाधाय चलन्ति विक्रये।

९. लवंग—चूड़ीयुत—पाद यामकैः—
संशोभिताः गुर्जर जाति संक्रमाः
अधः प्रयान्त्येव हिमेन पीड़िता
क्षेत्रेषु ग्रीष्मेषु च शस्य धारिषु।

१०. वर्षातपे क्षीण तमे समागते—
पुनः समारुह्य च गह्वरश्रियम्—
स्वैः स्वैः सुसज्जैः महिषी धनैः सह—
क्रीड़न्ति तानि गिरि गह्वराणि।

११. शुद्धं घृतं यल्लभते विपण्यां—
यायावरैः संचितमेतदस्ति —
गहन् महर्षि मधु मक्षि संचितं—
देवार्चनार्थं हिम निःसृतं स्यात् ।

१२. वल्ह्यो वनेष्वौषधयो ऽमृतोपमाः—
याः जीवने जीवन धारणे क्षमाः
रसेन सिक्ताः नव जीवन प्रदाः
वृन्दा—हरिद्रा यौनर्नवा मता ।

१३. शुण्ठी च शुष्का मधुयष्टि संयुताः
अन्याश्च त्रिफलामित योग संप्लुताः
हरन्त्यघं मानव रोग संचयास्
शतायुषः सात्त्विक वृत्ति संयुताः ।

१४. गृहे गृहिण्यः सत्यः सुकौशलाः
सैन्याश्च शूराः कृषि हृष्ट विक्रमाः
प्राप्तादराः सैन्य बलेषु संगरे
सौम्या स्सुसज्जा स्सुदृढा स्सुकोमलाः ।

१५. ग्राम्याश्च पौराः विचरन्ति पर्वते
महीरुहाणा मटवीषु सादराः
गायन्ति गीतं गिरि ताल मिश्रितम्
मन्वालये मानव निर्मिता स्थली ।

१६. वशिष्ठ कुन्दे प्रवहन्ति निर्झराः
शीतोष्ण कुन्देष्ववगाह्य मानवाः
हिडिम्बिका मन्दिर माश्रयन्ति हि
हिमालयेऽस्मिन् बहु देव मन्दिरे

१७. वहूनि सन्ति सरितः सरांसि च
वङ्यश्च भाषाः पार्वत्य संस्कृतिः
सुसंस्कृता याति समस्त भारते
मेघस्य दूतः हिम मण्डितां धराम्।
१८. निजैः प्रसूनैः प्रतिपूज्य सादरम्—
संदिम्यसंदेश मुदार विक्रमः
ययौ पुनः यक्षपुरी मनोरमाम्
तत्रैव विचचार स व्योम वाहकः।
१९. पुरा कवीनामुररी कृत स्वनः
हिमालये हैम विभूषितागने
ह्यावास माचकुरिमे कवीश्वराः
हेमांगना पाद शिखा विभूषितं
२०. गायन्ति गीतं सुधियो मुनीश्वराः
अत्रैव द्वादा, कविरस्ति गायकः
षड्वाग् विभूपित विष्धैरमरत्व नायकः
गीता-पुराण निगमैः रुचिरैः प्रकोषैः
२१. सद्बुद्धि जीवि वर्ग कविता प्रदायकः
विरच्य दादा नव कुण्डली त्रयं—
सहस्रमानं तद्दर्शन त्रयं—
अन्याश्च विविधाः विरचय्य सत् कथाः
२२. आमोदमाप्नोति निजाश्रमे वसन्
प्रख्यात हैमाचल दुर्ग दुर्जये
द्वारे शुभे प्रस्तर खण्ड निर्मिते
वासं चकारात्र मनोरमे गिरौ
राज्ञां गृहे प्राक्तन, नूर, नामके।

× × × × ×

# शिमला नगरी

१. शिमला नगरी विश्वे ख्याता
प्रकृते: शोभा भुवि विख्याता
पिल्ल्या आसीद् ग्रीष्मं स्थानम्
२. नित्यं धावति शफटी मानम्
कुटिला: मार्गा स्सरला: लोका:
३. निवसन्त्यत्र जना: विशोका:
अंग्रेजानामयमावास:
४. नाच भीतिर्नाभ त्रास:
चौर: दस्युर्नात्र लभेत
५. सभ्य नागर अत्र वसेत्
शास्ता परमार स्संजात:
६. हिम मण्डल खण्डानां त्राता
राजानस्सर्वे संभूता:
७. राष्ट्रे सर्वे—एको भूता:
एकी भूम हिमे निर्माणम्
हिम शिखरे गच्छति वस यानम्
८. किंचित् कालं शान्ता मन्त्री
भूत:—विपरीता—जन तन्त्री—
९. चलति चलति नियमे शासनम्
दूरी भूतं भ्रष्ट शासनम्
१०. पारस्परिके द्वन्द्वे लीन:
शान्ता जात: मित्र विहीन:
११. शैलं कुंजं त्यक्त्वा गत:
साहित्ये लेखने सं रत:

१२. वीरः भद्रः केन्द्रे मन्त्री
त्यक्तं पदं कम्पिता तन्त्री

१३. हिमाचले सत्तायां रूढ़
राज नयज्ञोऽतीव निगूढ़ः

१४. –वन माफिया—विनाशे लग्नः
भ्रष्टाचार निरासे मग्नः

१५. साफल्यं न लेभे तत्र
भ्रष्टाचारैः यत्र सर्वत्र

१७. भ्रष्टाचारे दिल्ली लीना
हीना जाता दीन मलीना

१८. क्वासौ गान्धी क्व राजीवः ?
क्वासौ नेहरुः क्व संजीवः ?

१९. मशोवरायां धर्मे लग्नः
तत्र दिवाकर दत्ताचार्यः—

२० दिव्य ज्योतिषः स्तंभ लेखकः
संस्कृत भाषोद्धारे मग्नः

२१. पचाचारे सिद्ध हस्तकः
नाना शास्त्र विचार विवेकी

२२. हिन्दू धर्म प्रचारे सक्तः
भारतीयताया अनुरागी

२३. वीर भद्र नाम्ना वर राजा
सत्तायां शिमलायां रूढ़ः

२४. हिमाचले व्याप्ते दुर्भिक्षे—
भूचालेऽसौ नितरां खिन्नः

२५. आरक्षी बल संघानां च
क्वचिद् बलात्कार संघातः

२६. कृषि भक्षभेद् या रक्षाली—
तया कृषेः रक्षा किं भाग्या ?

२७. आरक्षी वल भ्रष्टाचारे
जनतायाः रक्षा संभाग्या ?

२८. मद्यं चौर्य्यं दण्डपातः—
आरक्षी वल शिष्टाचारः

२९. याप्यति कस्मिन् गर्त्ते देशः ?
कस्मिन् कूपे मज्जति देशः ?
कुभ गतः गान्धेः सन्देशः ?

३०. कुत्र गतः नेहरो रादेशः ?
भ्रष्टाचार निवारण हेतोः—
वन माफिया विनाशे लग्नः—

३१. भ्रष्टाचारः शिष्टाचारः—
भारतस्य सिद्धान्तः जातः—

३२. उन्मूलभितुं भ्रष्टाचार—
३३. नाद्य भारते कोऽपि जातः
३४. शिमलायां भ्रष्टाचाराणां—
बह्व्यः कथाः गोचराः जाताः

३५. षड्यन्त्राणि त्रिफली कर्त्तुं
राज्य शासनं सदा तत्परम्—

३६. क्वचिद् क्वचिद् वर्षा—दुर्भिक्षं—
क्वचिद् क्वचिद्धि दण्डपातः

३७. जनतन्त्वं वैरूपी कर्त्तुं—
केचन नेतार स्स्युस्सज्जाः—

३८. तेषां कृते समाजे चर्चा
तेषां कृते भयं न लज्जा

३९. गच्छतु गर्त्ते राज्य शासनं—
गच्छतु यमलोकं जन भाषा—

४०. आसन्दी स्यात् सदा रक्षिता—
मन्त्रित्त्वे पूर्णा ह्यभिलाषा

४१. सिद्धान्ता:—सिद्धान्त हीनता—
आदर्शानां कथा: विलीना:

४२. अद्य समाजे खिन्न: दीन:—
सो हि मनुजो यो धन हीन:

४३. ऋद्धि स्सिद्धि: रूप्यक वृद्धि:—
येन केन मार्गेण विधेया—

४४. जीवन चर्या निज परिचर्या—
जीवन काले हि सन्धेया

४५. चारुवाक् मार्कानां देशे—
केचन सिद्धान्ता:—सिद्धान्ता:

४६. लोकतन्त्र परिपाटी दुष्टा
न्याय वादिता सत्य प्रतिष्ठा

४७. न्याये निष्ठा सादपि नष्टा—
सत्या हिंसाचार पराणां—

४८. तन्त्रेऽस्मिन् दुर्गति: संभाव्या
हन्त—हन्त—हा—हा—हा भूता—
विदुषामपि समाजे निष्ठा।

४९. शंकर काले संकर काले—
भारतीयताया: या हानि:—
अस्मिन् काले—तस्मिन् काले—
को हि मूर्ख: को हि ज्ञानी?

× × × ×

# सुभाष चन्द्रोदय प्रशस्तिः

१. सुभाष चन्द्र भाषिता सुभाषिता मयाऽहृता
प्रशस्तिमान मद्भूतं प्रशस्ति माप्नुयाद् भुवि
२. पंच त्रिशत् ख्रिष्टाद्वे वोसः लवपुरे मया
दृष्टः श्रुतं च तत्रैव तस्य शौर्य्यान्वितं वचः
३. गान्धी वादं परित्यज्य तदाऽसौ कृत भाषणः
फारवर्ड ब्लाकाख्यं रचया मास भारते
४. दलं क्रान्ति दलं तद्धि गान्धीवाद विरोधः कृत
आंगलैस्सह संघर्षः सर्वत्र निरत स्तदा
५. तदैव कृत संघर्षः वोसः सः रुग्णोऽभवत्
चम्बामण्डले तत्र डलहौजी नामं पर्वते
६. शीत स्थले चिकित्सां सः न्यदद्यात् क्षय पीडितः
स्वास्थ्य लाभं पुनः कृत्वा सुस्वस्थो विगत ज्वरः
७. आंगलैस्सह तुमुले संघर्षे निरतोऽभवत्
डलहौजी नाम तत् स्थानं मस्मद्देश पार्श्वजम्
८. पूर्वं मासीच्च पंजाबे चम्बायां वर्ततेऽधुना
आजादहिन्द सेनायामस्मन् मित्राणि चाभवन्
९. तानि सर्वाणि परलोके वासं कुर्वन्ति चाधुना
सुखदेवस्य–भक्तस्य–शव यात्रा गुरोस्तथा
१०. यदा जाता लवपुरे सा दृष्टा निज चक्षुभिः
लक्षशः जन समवायसदा लवपुरेऽभवत्
११. गान्धी दृष्टः श्रुतो नेहरूः दृष्टो मालवीयकः
स्वाराज्यस्य च योद्धारस्सर्वे दृष्टाः लवाह्वये
१२. चन्द्रोहस्य निर्माणे वोसस्याख्यायने मुदा
यद्दृषं यच्छ्रुतं नात्र गीर्वाण्या मुपपादितम्
१३. तत् सर्वं विदुषां चित्ते सततं मुदमावहेत्
१४. चक्रधारी सुशर्माऽहं षड्भाषा कविताकरः
धन्यवादान् शुभाशंसाः वितनोमि प्रकाशने।

× × × × × ×

## चम्बा नगरी

१. रम्य तटेयं चम्बा नगनी
हिमगिरि शोभा चम्पाख्याता,
२. रावी, कलकल, पूर्ण निनादा—
नद्योर्मध्ये भुवि विख्याता—
३. राज्ञामासोत् क्वचिदावास:—
प्रासादा: वन वीथी विहारा—
४. पुष्पोद्याने रम्या क्रीड़ा—
पार्वत्या: ललना: सव्रीड़ा:—
५. लक्ष्मी नारायण प्रभु शोभा—
चौगाने विहरन्ति विहंगा:—
६. रावी पूज्या मादृशी गंगा—
स्नान्ति युवान: युवती समूहा:
७. बालानामपि रुचिरा: व्यूहा:
ताम्बूलं चर्वन्ति नागरा:
८. क्रीड़ासक्ता: क्वचन वानरा:
रक्त मुखा: कृष्णानन युक्ता:
९. वृन्दै वृन्दै र्भ्रमणे सक्ता:
वेदोच्चारण रता: ब्राह्मणा:
१०. त्रैवर्ण्यं वितनोति कर्मणा
चम्पा पुष्प सुगन्ध विभूति:

११. नासाग्रे वसति रस सूतिः
हिममण्डित शिखराणामामा

१२. चतुर्दिक्षु सुर तरु प्रतिच्छाया
भूर्ज पत्र तरु शोभा युक्ताः

१३. सुर मुनि जन मानस अनुरक्ताः
शैव भूमिः भरमौर निवासः

१४. प्रत्यक्षं कैलाशे वासः
तत्र शिवः कैलाशे निवासी

१५. विश्वनाथ भूमिरिह सुखदा काशी
हिम मण्डित कुण्डेषु स्नान्ति

१६. त्रिविधाः वाताः नित्यं वान्ति
दादा कथयति चम्बा चित्रम्

# ताप तप्तो हिमाचलः

१. सप्ताशीति तमे वर्षे हिमाच्छन्ने हिमाचले
वर्षत्यातपे तप्तं हिम खण्डं सुभारते
२. नैतादृशी ताप भीतिः श्रुता पूर्व न गोचरा–
यादृशी श्रावणे मासे वर्षेऽस्मिन् सकपद्यत
३. तप्ताः धान्याः कृषिर्नष्टा तप्तेयं चोर्वरा मही
शुष्काः नद्यः नदास्सर्वे परं शोष मुपागताः
४. प्रस्रवन्ति यत्र शीताः नद्यः वेग प्रदूरिताः
शष्कैः प्रस्तर खण्डैश्च ताप ताप्ताः रुदन्तिहि
५. क्रीड़न्ति यत्र तोयेषु प्रसन्नाः जल जन्तवः
तापतप्तेषु गर्त्तेषु विषादं परमं गताः
६. पमः कीनालममृतं जीवनं भुवनं वनम्
कोश वाणी गता क्रोशं जीवनं मरणायते
७. सर्वाः गुल्मलताः भ्रान्ताः भेकाश्त्ताश्र प्रपूरिताः
हा तोयमिति–हातोयम् ! क्रन्दमानामृता इव
८. वत्साः गावो महिष्यश्च जलमवगाह्य शीतलम्
लभन्ते स्य महा शन्तिं भयाक्रान्ताश्च दुद्रुवुः
९. चीड़ानां देव दारूनां माम्राणां हिम वासिनाम्
शुष्कानि मधु गायान्नि पत्र पुष्प फलानि म
१०. सेवानां स्कैव दग्धानां लोचीना मार्द्रता गता
वानस्पत्यं च भर क्षेत्र रणक्षेत्रमिवाभवत्
११. भूचालेन विनष्टाः ये ग्रामाः शुष्के हिमाचले
सुख स्वासं विदमानाः धर्मगर्त्ते निपातिताः
१२. किं करिष्यति सरकारः दैवो यद्यवसीदति
किं करिष्यति राजीवः ? दैवो नैवाभिवर्षति
१३. शुष्काः कुल्याः तड़ागाश्च सरांसि सरितः नदाः
तोय दुर्भिक्ष कालेऽस्मिन् हा–हा–भूतं हिमाचले
१४. चक्रं धारयति शास्त्री गीर्वाणी रचना करः
षड् भाषा काव्य कर्त्ताऽसौ कल्पद्रुम उपासकः

× × × × × ×

# वर्षा-प्रलयः

१. वर्षा सत्रावसानेऽत्र संजातः यः जलप्लवः।
प्रलयस्य च सन्त्रासः सर्वत्र समाजयत॥
२. जलौघाम्छिन्नमर्यादाः सर्वत्र जलपूरिताः।
वहन्ति स्म गिरेः शृङ्गान् छित्वा धरांगणे॥
३. शतहोरावधि यावत् धारा बद्धा, कुवृष्टयः।
वर्षन्ति स्म धरा छिद्रे ग्राम्यनागरसकुले॥
४. शतशो लक्षणः भग्नाः कोष्ठाः ग्राम्यगृहाणि च।
मार्गाः रुद्धाः रेलयानमवरुद्धं समन्ततः॥
५. शिशवो बालकाः वृद्धा जलौघेषु न्यमज्जन्।
हैमाचलभूमौ च पञ्जाबे हरियाणके॥
६. दिल्ल्यामपि जलौघेन शान्तिर्भग्ना निरन्तरम्।
हा तात! हा जगन्नाथ! क्रन्दन्तो महिलागताः॥
७. पुत्रान् बन्धून् विसृज्याद्य प्रलये लयवागताः।
सर्वकारस्य वैफल्यं सर्वत्रैव हि दृश्यते॥
८. बन्धेषु यज्जलं बद्धं जलापूरेण घूर्णितम्।
त्यक्तं यदा तदा क्षेत्रे प्रलयः समपद्यत॥
९. शतशः पशवो नष्टाः गोवंश महिषी गणाः।
गर्जराः मण्डनिवग्नाः चिरनिद्रासु लेरते॥
१०. गुर्ज्र्यः व्यासक्षेत्रे याः सेवन्ते शस्त्रवाटिकाम्।
दुग्धभाण्डसमोपेताः व्यासनद्यां न्यमज्जयन्॥
११. चक्की नद्युपकण्ठेऽपि गिरिशृङ्गप्रपातनात्।
दशसंख्याः जनाः नष्टाः सपुत्रदारैर्मिश्रिताः॥
१२. तदृश्यं हृदयोच्छेदि प्रस्तरस्यापि भेदकम्।
दृष्टं मया निजैः दृगै महद् तद्दारुणं मुहुः॥
१३. पितृहीनाः सुपुत्राश्च नार्यः स्वामीविहीनकाः।
भ्रातरः शिशुहीनाश्च जलौघे लय मागताः॥

१४. नैतादृशः प्लावौघश्च वर्षेषु समजायत।
यादृशोऽष्टाष्टिवर्षेऽस्मिन् भारते समपद्यत॥

१५. संसारस्य व्यवस्थाः याः सूचना माध्यमे रताः।
महद् दुःखं महान् शोकं वर्णयन्ति क्षणे क्षणे॥

१६. कांगड़ामण्डले व्याप्ते प्लवौघं दूरगामिनि।
मन्त्रिणः सर्वकारस्य–जनसन्ताड़न गताः॥

१७. कुशलं क्षेममिच्छन्ति प्लववेगप्रपीड़ितान्।
जलबन्धान् विनिर्माय धान्यशस्यप्रदाकान्॥

१८. सर्वकारः प्रसन्नो न भग्नाः बन्धाः जलाशये।
भूचालेन विनष्टा ये वराकाः गिरिगह्वरे॥

१९. ते सर्वे जलसंघाते निद्रायन्ते जलाशये।
जलबन्धसमारंभे गृहान्निष्कासिताः जनाः॥

२०. इतस्ततो भ्रमन्ति स्म प्राणरक्षणहेतवे।
अद्यापि ते जले मग्नाः सकलत्राः सबान्धवाः॥

२१. जलौघत्राससंभीताः पूर्वपश्चिमगोचराः।
जलयानैः रक्षिताः केऽपि विमानैः परिरक्षिताः॥

२२. लेभिरे शरणं केऽपि वनवीथीष्टवीषु च।
हा–हा–भूतान् क्रन्दमानान् दृष्ट्वा नष्टानचेतसः॥

२३. वज्र भूतानि चित्तानि द्रवन्ति स्म हिमालये।
क्षेत्रे समतले क्रोशान्-क्रोशान् लोकान् निपीड़यन्॥

२४. जलौघः प्रवहेत्तत्र निरंकुश इव हस्तिराट्।
दादा नूरपुरी दृष्ट्वा प्लवसन्तापघूर्णितान्।
जनान् करुणयाविष्टः श्लोकान् व्याजहारह॥

× × × × × ×

# दृष्टामया मुंबई

१. भारते पश्चिमे भागे क्षार सिन्धु तटे शुभे
रचिता मुंबई नाम नगरी विश्व विश्रुता

२. सागरस्योर्मिभिः क्रान्तं तटे वीक्ष्य सुरासुराः
तत्रैव वासमिच्छन्ति यत्र वारुण सागरः

३. प्रस्तरैः पर्वतैरुच्चै राक्रान्त तट मेखलम्
पूरितं जल मध्यस्थ मांगलैस्तत्र शासकैः

४. निर्माणं पुर्याः वीक्ष्य विश्वस्यागन्तुकैस्तदा
भवनानि तत्र गगने लखितानि बहून्यपि

५. कृतानि सर्वकारेण यात्रीणां सुखेदानि च
चतुर्दिशं समुद्रेण वेष्टिता नगरी शुभा

६. द्वारिकायाश्च समतां विद्रधाति मुहुर्मुहुः
चित्राणां चल चित्राणां मेकला मुंबई मता

७. व्यवसायस्य केन्द्रं तत् विश्वे विकासितं महत्
शकटीनां जल शकटीनां पोतानां सिन्धु चारिणाम्

८. दृश्यं सुदुर्लभं तत्र दर्शनीयं स्थलं महत्
रेलयानं यत्र तत्र लभते च क्षणे क्षणे

९. काराणां पङ्क्तिं वीक्ष्य मनो विस्मय संयुतम्
मानवाः मानवान् दृष्ट्वा हृष्टान् प्रष्टान विचक्षणान्

१०. लक्षशो वीक्ष्य सन्देह सागरेदत्र निमज्जति
कश्चिद् धनाढ्याः समृद्धाः पीनोदरं कलेवराः

११. चलितुं नोत्सहन्तेऽत्र धन संचय तत्पराः
क्वचिद् वराकाः दुर्भिक्षे पीड़िताः श्रम जीविनः
१२. मार्गेषु वास निर्माणं कृत्वा दुःखेन शेरते
अट्टालिकानां सम्मोहे निमग्नाः श्रेष्ठिनस्सदा
१३. वाञ्छन्ति धनहीनानां लुण्ठनं बहुयत्नकैः
सिन्धु स्नाने निमग्नानां बालानां जल चारिणाम्
१४. मनो हरति दृश्यं तज्जुलेऽत्र सागरौकसाम्
मुक्ताः शुक्तीः समाहृत्य बालकाः सिन्धु मध्यतः
१५. क्रीड़न्ति जल धाराभिः मुम्बय्याः च जुहू तटे
कुत्रचित् चित्र शालानां शोभाऽत्यद्भुता मता
१६. चटकानां गृहं तत्र दर्शनीयं महाद्भुतम्
उद्यानानि सुरम्याणि सिन्धु मार्गाश्रितानि च
१७. वीक्ष्य–वीक्ष्य–पुनर्वीक्ष्य मनो निर्द्वन्द्वतां व्रजेत्
किमियं देवराजस्य पुरी स्वर्लोक वासिनः ?
१८. किमियं वारुणी नाम नगरी विश्व वन्दिता ?
देवाः क्रीड़न्त्यहोरात्रं दैत्या अपि रमन्ति च–
१९. गौराः कृष्णाश्च पौराश्च विजरन्ति भ्रमन्ति च–
अर्द्ध नग्न शरीराणां नारीणां वीक्ष्य कौतुकम्
२०. लन्दनं–पेरिसं ह्येतत् ? मनो विभ्रमतां व्रजेत्
नृत्य शालाः रंगशालाः नाट्यं पश्चिम पूर्वजम्
२१. दृश्यतेऽहर्निशं तत्र, यौनं, विस्मय कारकम्
समुद्रे तैल कूपाश्च निखाताः नव यन्त्रकैः

२२. सागरस्य च सम्राजा पोतेनाहर्निशं जले
कल्याणे विरलाख्येन श्रेष्ठिना रचिते पुरा

२३. मन्दिरं श्री विठोवाख्य माश्चर्य्यं मुद्रयांकितम्
विठोवाभगवाँस्तत्र भक्तानां हित काम्यया

२४. ग्रन्थनां वैदिकानां च प्रकाशो वेङ्कटेश्वरे
कल्याणे वहु वर्षैश्च जायते मुद्रणालये

२५. मुम्बादेवी जगद्धात्री तन्नामा नगरीमता
सिन्धु तीर समान्ना पादोन कोटि संख्का

२६. हैमाचल प्रान्तस्य तत्रत्यैः पुर वासियः
भवनं निर्मितं शुभं हिम संस्कृति मण्डतिम्

[शार्दूलम्]

२७. विश्वस्योच्चमैं महार्घे भवनैं राच्छादिता यादुरी
विश्वेऽत्युन्नत पौरवारा निलयेष्वानद्रिता माधुरी
सिन्धौ सप्त समुद्र वेष्टित धुराख्याता च या सुन्दरी
विश्वस्यान्यतमा विशाल नगरी दृष्टा मया मुंबई।

× × × × ×

# जम्बू द्वीपः

१. जम्बू द्वीपः—जम्बू द्वीपः
भारत खण्डे जम्बू द्वीपः
आर्यावर्त्ते ज्योति दीपः
यत्र नागरा स्सभ्याचाराः
२. शिष्टा स्सौम्या स्सभ्याचाराः
अधुना डग्गर देशः ख्यातः
३. सौराः राजानो विख्याताः
शूराः वीराः धर्मे लग्नाः
४. न्याये—दाने—ज्ञाने मग्नाः
जम्बू नगरी शोभा युक्ता
५. मन्दिर भूमिः पाप विमुक्ता
रघुनाथो देवोऽत्र शोभितः
६. नाना देवैरपि संसेवितः
रणवीरेश्वर नाम्नाऽऽख्यातः
७. देवोलयोऽत्र जगद् विख्यातः
स्फाटिक लिंगाः लक्ष संख्यकाः
८. हर हर महादेव, गुंजिताः
स्थाने स्थाने पूजा ह्यर्चा
९. क्षेत्रे क्षेत्रे धर्मे चर्चा
उष्णीषैरावेष्टित मस्तकाः
१०. सौम्यैः परिधानैः परिवेष्टिताः
डुग्गर भाषीयामनु[illegible]

११. भोग विलासे तीव्र विरागः
साहित्ये रुचिरादर भावः
१२. चित्रकलाया राविर्भावः
डुग्गरनार्थः रुचिराकाराः
१३. सुन्दरभैः सौम्याः मधुधाराः
डुग्गर वेषे कृत परिधानाः
१४. चूड़ी युक्ताः पादायामाः
पीनोन्नत वक्षोज शरीराः
१५. शौर्यः सत्यः धीराः वीराः
नखे शिखे शुभ्राः शुभकामा
१६. गृह कर्मणि दक्षाः अभिरामाः
अपराजिता वैष्णवी देवी
१७. श्रीधर कन्या कूट निवेवी
डुग्गरात् परवः काश्मीरः
१८ आदि शक्ति-वरदाऽभय दात्री
शिवापूज्या—मांगल्य प्रदात्री
१९. नव दुर्गा रूपिणी भवानी
लक्ष्मी—काली—श्रीः गीर्वाणी
२०. पूरमेत् भक्तानां कामम्
तीर्थं दृष्ट्वा महदभिरामम्
२१. जयघोषं कुर्वन्तो मान्ति
त्रिविधाः नन्दाः वाताः वान्ति
२२. अधुनाऽप्येकः राजा चास्ति
कर्णसिंह तुल्योऽन्यो नास्ति
२३. धर्म ध्वजः वीर व्रत धारी
विदुषां सत्कर्त्ता यवनारिः

२४. केन्द्रे मन्त्री पदवीं गतः
साहित्य सेवने रतः

२५. डुग्गर जातेरियमभिलाषा
मधुरा—मिष्ठा—डोगरी भाषा

२६. तस्योन्नमने बद्ध परिकराः
जाताः शतशो डुग्गर कविवराः

२७. कमल नेत्र स्वोत्रस्य गायकः
दत्तदास कविरमर गायकः

२८. डुग्गर भूमौ लेभे जन्म
तेपे तपः कृतं सत् कर्म

२९. वहवो विद्वांसो भुवि जाताः
डुग्गर भाषाया विख्याताः

३०. पुरा युगे विदुषामयभाकरः
संस्कृत विद्यायाः रत्नाकर

३१. भारतीय संस्कृतेः प्रारूपः
हिन्दू जागृति स्तंभः स्तूपः

३२. वयमपि त्रैगर्त्ते यदि जाताः
डुग्गर देशोऽस्माकं भ्राता

३३. भाषा——वेषाः——देशः——भूषा
डुग्गर संस्कृत्याः मंजूषा

३४. सरलाः लौकाः दंभ विहीनाः
गौरव युक्ताः कर्मणि लीनाः

३५. चौरः दस्यु भ्रष्टाचारी
लभते नाच स्वेच्छारी

३६. केसर गन्धी यत्र समीरः
अमरनाथ मार्त्तण्ड तड़ागाः

३७. जम्बू देशेऽयं संभागाः
तत्रासीत् कदाचित् काशी

३८. शंकर पीठे मुनि संन्यासी
अग्रे लद्दाख प्रतिवेशी

३९. जम्बू द्वीपे हिंसा द्वेषी

४०. वर्तन्तेऽत्र बोद्ध विहारा

४१. चीनेनात्र कृताः प्रहाराः
प्रत्यावर्त्य गतोऽसौ चाउन

४२. मरणासन्नः जातः माऊन
सिन्धु नद्या अयं प्रदेशः

४३. हिम खण्डाना मुज्ज्वल वेषः
धवलाः धाराः हिम सुसज्जिताः

४४. नीलम—मणि माणिक्य मज्जिताः
जम्बू द्वीपः षड्रस भोगी

४५. शिखरे शिखरे विहरति योगी

४६. चक्रधारी कविः कविताकारः
षड्भाषासु रचना कारः

४७. जम्बू द्वीप कथा ह्यनुरक्तः
बहुभाषानामस्ति प्रवक्ता।

× × × ×

# कुंभ महापर्व

१. देव दानव संग्रामे मथ्यमाने महोदधौ
देव दानवयोस्तत्र संघर्षो महानभूत्
२. अनन्त रज्जु निर्बद्धः सुमेरु गिरिराट् तदा
सागरेऽसुर देवानां कौतूहल करोऽभवत्
३. अमृतस्य यदा कुंभः समुद्राद् वरिरागतः
देवासुर संघानां संघर्षः महान भूत्
४. आकाशे विचरद्भिश्च देवासुर सुसैनिकैः
घटस्य क्षेपणं यत्र तत्राभूत् भुवि मण्डले
५. अमृतस्य घटं छित्वा भित्वा देवारि सैनिकाः
दुद्रुवर्यत्र तत्रैव सुधा कुंभापहारकाः
६. देवानामपि सैन्यैस्तद् कुंभं छिन्नं मुहुर्मुहु
पतन्ति बिन्दवो भूम्यां भारते कुंभ संभवाः
७. अमृतस्य यदा तत्र कुंभ पर्वं उदाहृतम्
भारतस्य चतुर्दिक्षु चत्वारो कुंभ मेलकाः
८. संजायन्तेऽनादि कालाद् धर्म रक्षण हेतवः
उज्जयन्यां महाक्षिप्रा नद्यां कुंभ मेलकः
९. जायते च पुनस्तत्र पुष्करे प्रति पद्यते
गंगा तीरे हरिद्वारे कुंभ पर्व उदाहृतम्
१०. प्रयागे तत् त्रिवेण्यां च पुनः संजायते मुहुः
कोटिशो जनता स्नान्ति त्रिवेण्यां कुंभ पर्वणि
११. अवगाह्य लभते पुण्यं कायिकं मानसं ध्रुवम्
भारते पुण्य भूम्यां च लभन्ते जन्म ईदृशम्
१२. यादृशं नादृतं कुत्र पूर्व पश्चिम मानवैः
धन्येयं भारती भूमि र्धन्येयं भारती धरा
१३. धन्योऽहं श्लोक कृद् दादा विदुषा मनुसेवकः
दादा नूरपुरी नामा पड् भाषानां प्रचारकः
१४. द्विसप्तत्युत्तरे काले कुंभ पर्व समागतम्
मकरस्थे दिवानाथे वृषस्थे च बृहस्पतौ

१५. अद्य पुण्या महावेला पुण्यः पूतः समागमः
साद्धैक कोटि संख्यात्र स्नाति दिव्य मण्डले
१६. प्रातः काले शृणोम्यद्य स्नान–संगम सत् कथाः
वाचिता वाचकैस्तत्र नभो वाणी प्रसारकैः
१७. सार्द्ध द्विशत संख्यकै दूर दर्शन माध्यमै.
विश्व ख्यातै स्समाकीर्णः कुंभ पर्व महोत्सवः
१८. विश्वे नैतादृशः मेलः कदाचित् समपद्यत
यादृशः लक्षैक वर्षैरत्र संजायते मुहुः
१९. संसारस्य चमत्कारः विख्यातः भुवि मण्डले
केवलं स्नानदानाभ्यां कोटिशः जन संग्रहः

—अद्य—

२०. अद्यापि सिन्धु निर्मन्थः जायते भुवि भूतले
तैलं–वाष्पं–विनिर्मथ्य वहिरायाति सागरात्
२१. प्रत्यहं लक्षशः तैल भाण्डानि परिपूरयंत्
मुखय्यां सिन्धु सम्राजा कृत मुत्खननं महत्
२२. वाष्प तैले समुत्पाद्य समृद्धि जायते भृशम्
अस्माभिर्निज चक्षुर्भ्यां मजगाँव तटे शुभे
२३. समुद्र मन्थनं कुर्वन् दृष्टः पोतः महार्णवे
पंचाशत विधि कैर्युक्तः जल चारी समुद्राद्
२४. विजहार धरा कामे समुद्र हृदये पुनः
विधिकाः कार्म काङ्क्षन्नाः मासं यावत् महोदधौ
२५. तत्रैव श्रममिच्छन्ति विहरन्ति रमन्ति च
मत्स्याः वक्राश्च पाशैश्च क्रीडन्त्यत्र जलोदरे
२६. कच्छपाः विकलायन्ते जलयान प्रधावनात्
व्हेलाः मत्स्याः लम्बमानाः पोतान् पावयन्ति हि
२७. निज शृङ्ग प्रपातेन किमाश्चर्य्य मतः परम्
गनडुब्बी समाकीर्ण मद्य सागर मेखलम्
२८. प्रत्यहं छद्म भेदी स्यात् सुसागर महोदरे
मुम्बय्यां फ्रांस देशेन चौपाही तीर सन्निधौ

२९. प्रदर्शिनी समाख्या विद्युत् किरण पातिनी
ईरानेराकयोर्युद्धे पोताः संहार कारकाः
३०. विध्वंसन रताः क्षेपा पोतान् पालयन्ति हि
तैलभार समाच्छन्नाः वहु संचालकै वृताः
३१. धारासारैः प्रहारैश्च समुद्रमधि शेरते
अस्माकं सैनिकैर्युद्धे लंकायां सिन्धु मध्यतः
३२. वहवो निहताः भ्रान्ताः तमिलाः क्रान्ति कारिणः
मालद्वीपे पुनः क्रान्ति कारिणो दस्यु रूपिण.
३३. निगृहीताः जलागारे यत्र तत्र पलायिताः
मालद्वीपाय तच्छत्त राज्यं वछस्युभिर्हृतम्
३४. ननुः होरावद्ये: पूर्वं भारतीयैश्च योद्धृभिः
मालद्वीपापहर्त्तारः निगृहीताश्च बन्धनैः
३५. मालद्वीप प्रशास्त्वे तच्छत्तं राज्यं च यावनम्
शरणापन्न रक्षाच्च विहिता पौर्व कालिकी
३६. दादा नूरपुरी साक्षात् संस्कृतां शारदां शुभाम्
बर्णोद् बहुभिः पद्यै विदुषां तोष हेतवे
३७. इलकानां संचयं दादा वर्णयामास पत्रकैः
मुद्रयामास बहुभिः पत्रकैः भारतोद्भवैः
३८. संस्कृत देववाण्यां यल्लिखे छादोपनाभकम्
विद्भिराहतं भूयात् सत् साहित्य धरोहरम्
३९. कुण्डली दर्शनं दादा रचयामास चाधुना
कुण्डली दर्पणं भूयः—गीता कुण्डलायिता
४०. गीता–गीता सुपद्येषु कुण्डली वृत्त धारिषु
टंकायिता पुनः गीता दादा स्वरः विभूषिता
४१. होरावद्ये च श्रोतव्या भगवन् मुख निःसृता
गीता वक्ता यत्र कृष्णो यत्र श्रोताऽस्ति भारतः
४२. दादा नूरपुरी मौनं किमर्थं धारयिष्यति ?

× × × ×

# आकाश वाणी ? दूरदर्शंशं च

किं विद्यात्याकाशे वाणी ?

१. देश विदेशे घटना चक्रं
श्रावयतीयं दिल्ली वाणी

२. क्वचिद् भवेद्यदि झांझावात:
क्वचिद् भवेद्यदि दण्डापात:

३. क्वचिद् भवेद्यदि गुलिकाघात:
त्वरयेयं श्रावयति वाणी

४. चतुर्दिक्षु चतुमुलं युद्धं
चलितं यज् जन मनो विरुद्धं

५. तन्निवृत्यै शान्ति वृत्यै
मुहुर्मुहः श्रावयति वाणी

६. नृत्यानां संगीतानां चा
योजनमपि प्रत्यहं याति

७. नेतृणा मभिनेतृणां च
वक्तृणां वाणी प्रतिभाति

८. सत्याचार: सभ्याचार: सुसमाचार:
श्रोतुं शक्य:

९. काऽपि वार्ता काऽपि घटना
याऽत्र नैव श्रोतु मशक्या

१०. बी०बी०सी० वायस अमरीका
रूसी चीनी जापानी स्यात्

११. सर्वा: वाण्य: संसारे स्यु:
निजे निजे देशे संस्तुत्या:

१२. दूरदर्शनान्यपि ख्यातानि
भूमण्डल परिवेषे स्वे च

१३. दर्शयन्ति घटनानां चक्रं–
व्याप्तं यत्र तत्र यत् वक्रम्

१४. अद्य जगन्नैकत्यं याति
क्षणे क्षणे प्रतिभा प्रतिभाति–

१५. अश्लीलं यत् सर्वं श्लीलम्
यौनाचारे सर्वं लीनम्

१६. यत्र तत्र रामायण चर्चा
यद्यप्यद्य सागर परिचर्या

१७. महा महाभारती ह्यर्चा
संसारे लेभे निजमानम्

१८. कुरुते कुरुते कीर्त्याख्यानम्

१९. चक्रधारी शास्त्री कविराजः
षड्भाषानां कविता कारः

२०. वर्णयेत् संचार व्यवस्याम्
स्वयं लभेत बहु विद्य दुखस्याम्

२१. संस्कृत विदुषां वार्ता चक्रे
चक्रधारी कविरपि संगीतः

२२. सार्द्धके मिनरेऽसौ दिल्ली केन्द्रे
संस्कृत चक्रे गीतः ।

× × × ×

# बी. बी. सी. किं किं विदधाति ?

संसारे विपुले विस्तारे समाचार सूचनां ददाति
१. विश्वेया: संचार व्यवस्था: सर्वासां नेता बी. बी. सी.
श्रोतुं श्रोतुं मनो विकलतां याति नित्यमेव बी. बी. सी.
२. समाचार-सम्पादन सुविधा लन्दन नगरेया विख्याता
मा नान्यत्र कदापि श्रोतुं द्रष्टुं शक्या विश्वे ख्याता
३. पंच विंशति शत साहस्रा: जनास्तत्र सेवायां लग्ना:
क्षणे क्षणे विश्वे घटितानां घटनानां प्रस्तारे मग्ना:
४. क्वचिद्गोलिका काण्ड रक्तानां-ताराणां संग्राम: प्रचार:
कूटनीति-रणनीति समीक्षा ज्ञाने-विज्ञाने विस्तार:
५. साहित्ये संगीते लिप्सा येषां तेषां मोद समर्चा
सिन्धौ किं प्राच्ये संसारे किं किं गगने धरातले स्यात्
६. किं प्रासादे पर्ण कुटीरे घटना चक्रं चक्री भूतम्
तत् सर्वं कलशायितमेतत् सागर गागर तुलना युक्तम्
७. चक्रधारी शास्त्री कविराज: षड् भाषानामस्ति प्रवक्ता
विशद वर्णभ्योऽसौ नितरां बी. बी. सी. संवादे सक्त:

× × × × × ×

# ब्रज भूम्यामिह किं किं दृष्टम् ?

ब्रज भूः वृन्दावन वन भूमिः
मथुरा-मधुवन-गोकुल भूमिः
गोवर्द्धन—बरसाना कोसी
नन्द गांव—गिरिराज—चँदौसी
कृष्ण जन्म भूमिरिहि दृष्टा
यमुना पुलिने तटिनी स्पृष्टा
गोपाः गोपी वृन्दाः दृष्टाः
गो गोवत्स समूहाः दृष्टाः
बांके दृष्टः दाऊ दृष्टः
रंगनाथ मन्दिर मपि दृष्टम्
सेवा कुंजां—कुंज वीथिकाः
यमुना पुलिने कृष्ण विहाराः
रास विहारी पुष्पोधाने—
नर्त्तन कारी लोकै दृष्टः
रास मंचिका—नाट्य मंचिका
क्वचित् क्वचित् माधुर्य्य संगमः
संगीतानां गीतानां च
क्वचिद् दृश्यते ताले पट्टिका
कादम्बानां पुष्पाणां च
सौरभ युक्तः मन्दः वातः—
ब्रजस्थ रसिकानां भक्तानां—
क्वचित् क्वचिद् गूढ़ः संघातः
राजा दृष्टः राज्ञी दृष्टा—
ब्रज भू रजसाऽऽकृष्टाः दृष्टाः—
नग्ना दृष्टाः विद्वांसोऽपि
कृष्णा कथा ह्यनुरक्ताः दृष्टाः

क्वचिद् वल्लरी लता प्रपात:—
क्वचिद् गन्ध वाही ब्रज वात:
ब्रजरजसाल्पुत महीरुहाणां—
क्वचिद् दृश्यते झंझा वात:—
सोऽपि मन्द: रजनी गन्ध:
बकुल मालती कुसुमाच्छन्न:
ब्रज रस मधुरै भावावेशै:
क्वचिद् दृश्यते भावापन्न:
गोपी भाव विभूषित देहा:—
दृश्यन्तेऽत्र भाव प्रपन्ना:
गोवर्द्धन—गिरिराज—वीथिषु
साष्टांगा: प्रणमन्ति भक्ता:
राधे! राधे! माधव भामिनि
गायन्तो विचरन्त्यनुरक्ता:
सूरदास रचनानां स्त्रोत:
मीरामाच्च गिरिधर भूमि:
तुलसीदास कृतोऽसौ दृष्टो
धनुर्बाणा धारी गोविन्द:
वेदान्तीनां महारथानां—
लुण्ठति यत्र ज्ञान परिचर्या
लुण्ठन्त्यत्र रिक्त हस्तका:
सोऽहं सौऽहं जय अनुरक्ता:
वैरागी संन्यासी दृष्ट:
गौरांगाना मिष्टं दृष्टम्
मधुरो गोपी गोपौ दृष्टौ
बंगाना मुल्लास: दृष्ट:
कृष्ण नाम संकीर्त्तन लग्ना:
वृन्दारण्य विहारा: दृष्टा:
अष्ट सखीना मद्भुत लीला—
युक्त: देवान्ययोऽत्र दृष्ट

राधा-माधव कुंज विहारी-
गोपीनाथः श्री गिरिधारी-
यद् दृष्टं यच्छ्रुतं कदाचित्
तन्नान्यत्र गोचरं जातम्
अखण्डे ब्रह्माण्डे नास्ति
कृष्ण नाम भूमौ यज्जातम्
सानन्दा. विचरन्ति विहंगाः
शिखिनश्चापि पिच्छ छायासु
विहरन्त्यत्र मेघ ध्वनि सक्ताः-
कृष्ण, कृष्ण, उच्चारण युक्ताः
नृत्यति रास विहारी तत्र-
गो गोपी समवाय समेतः
धिग्-धिग् धिक्-धिक् धा
धा धा धा
ताथेई ताथेई युक्तः
सारंगी मधुताल समेत
यत्र मृदंगः मधुरव वाद्यः
अष्टछाप संगीत समेतः-
दर्शक मनो मनोहर कारी
चक्रधारी कवि राज कीर्तितः-
कृष्ण नाम धाम अनुरागः
षड् भाषानामस्ति प्रवक्ता-
विचरेन् मनसि तीव्र विरागः
अष्टाविंशति वर्षेषु यद् दृष्ट-
श्रुतं ब्रजेश्वर धामनि-
तन् सर्वं स्फुटता मायाति-
दृष्टं यद् गोपेश्वर धामानि।

× × × ×

# कृतं प्रयाणं ह्यस्मिन् धरातले

१. हलद्‌णाख्ये महाक्षेत्रे प्रलयोऽयं तदा ह्यभूत्
सस्य पूर्णे जलाकीर्णे जलस्याऽऽप्लावनं यदा

२. सस्य पूर्णा धरित्री सा समुद्र सदृशाऽभवत्
लक्षशो मनुजा गावो महिषा वानरा: खगा:

३. स्वान् स्वान् नीड़ान् परित्यज्य राजस्थान च दुद्रुव
शेषा इतस्ततो भ्रान्ता: भग्नाशा: भग्न मनोरथा:

४. नैराश्य माप्नुयु स्सर्वे वराका: गृह वंचिता:
शिशवो जरठा: नार्यो युवका स्त्रास संयुता:

५. कंसाद् भीता: द्रवन्ति स्म यथा हिं ब्रजवासिन:
लक्षिण: कक्षिणो जाता: कणिक्षो धूलि धूसरा:

६. कष्टमापतितं घोरं प्रलये समुपस्थिते
हा तात! हा जगन्मात स्त्राहि त्राहीति क्रन्दनम्—

७. सर्वकारेण सर्वं वै हृतं नष्टं च वैभवम्
दृष्ट्वा वद्री विशालेन परेषां हित काम्यया—

८. पूर्णाद् धान्य धनाद्यै श्च ह्यासीत् यत्रोषितं सदा
त्राथू नाम्ना प्रसिद्धाद्धि तदा निष्कासनं कृतम्

९. मथुरां परित्यज्य यथा हि कृष्ण:—
प्रवासयामास निजात्म बन्धून्
समुद्र माश्रित्य हि द्वारिका पुरीम्
विकासयामास नलौघ संग्रहे।

१०. तथैव वद्री तनु धारिणा वै कृतं
प्रयाणं ह्ययस्मिन् धरातले
वापी: अटारी: कथिते स्थलेऽस्मिन्
श्रद्धा विनीतैः पुरुषैश्च पूर्णे।

११. तस्य पुनर्निवासाय प्रयत्नोऽयं महान् कृतः
भक्तेन दास नाम्ना हि पुरुषेषूत्तमेन च

१२. तद्यो वै नव दीक्षितः सच्छिष्यो गिरिधारकः
कुर्वन्तौ लोक कल्याणं गुरु शिष्यावुभावपि

१३. लोक संग्रह सिद्धयर्थं लोक कल्याण कारिणौ
तपस्तप्तुं कृतोद्योगौ जायतां मार्ग दर्शकौ

× × × × × ×

# कृष्ण चेतना संस्थापकः प्रभुपादः

१. प्रभुपादो बभूवैको बंगाली विदुषांवरः
बंगाले कलिकातायां न्यवसद् वैष्णवाग्रणीः
२. कृष्ण पादानुरागी सः गौड़ीय मठ दीक्षितः
तत्याज–प्रमदा पुत्रान् व्रज सेवा परोऽभवत्
३. दशवर्षाणि कृष्णस्य क्रीड़ा भूमौ भ्रमन् सदा–
वृन्दावनं परित्यज्य नान्यत्र वासं मिच्छति
४. नाम संकीर्त्तनं लक्ष्यं कृष्णस्य स्मरणं मुदा
कृष्ण! कृष्णेति कृष्णेति व्याजहार दिवा निशम्
५. कृष्णस्य प्रेरणा जाता प्रभुपादस्य मानसे
गच्छ, गच्छामरीकायां गीतायाः श्रावणं कुरु
६. सप्तत्युत्तर वर्षीयः परिव्राट् कृतचेतनः
गन्तुमिच्छामि तद्देशं-यत्र नास्तिक मण्डलम्
७. वीत रागेण प्रभुणा भाटकाय प्रचारितम्
देसाई परिवारेण भाटकायोजनं कृतम्
जलयानं समारुह्य परिव्राट् दृढ़ निश्चयः
८. गौरांगानां महादेशं प्रस्थितः रिक्त हस्तकः
९. प्रथमे दिवसे तत्र पुष्पोद्यानेऽवसद् यदा–
नाम संकीर्त्तनं चक्रे गीतायाः वाचनं तथा
१०. द्वित्राः सम्मिलिताः भक्ताः पुष्पोद्याने मनोरमे
शुश्रुवुः कीर्त्तनं तस्य गीतायाः भाषणं तथा
११. भारतादागतस्यास्य सतः कृष्णानुरागिणः
भक्ताः संघं विनिर्माय प्रचारे निरता स्सदा
१२. वर्षद्वयेऽमरीकायां संस्थानं व्यदधुस्तदा
लास एजंल्स नगरे कृष्णस्य चेतना कृता
१३. वृन्दावनस्य प्रारूपं मभजन् गौर सेवकाः
दश वर्षेषु पाश्चात्यैः गौड़ पादानुयायिभिः

१४. पश्चिमे वहु देशेषु मन्दिरायोजनं कृतम्
फोडख्येन समूहेन प्रभुपादाय सादरम्
१५. कोटयर्द्धं सम्प्रदत्तं मन्दिरायोजनाय वै
गौर्याः वालाः मयादृष्टाः नृत्यन्त्यः कृष्ण मन्दिरे
१६. जय देवस्य गीतानि गायन्त्यो ब्रज धामनि
पंच वारं मया साक्षात् कृत्वा पृष्टो गुरुं प्रभुः
१७. कथमेतच्चमत्कृत्वा भवताऽऽलोकितं जगत्
गुरुण्डाः गौर सर्वांगाः रिव्रष्ट धर्मानुयायिनः ?
१८. कथमाकर्षिताः नूनं ब्रज मण्डलं धामनि ?
हरे कृष्ण! हरे कृष्ण! नामोच्चारण भेषजात्
१९. प्रभुपादेन सम्पृक्ताः कृष्णस्य शरणं गताः
इंगलैण्डेऽपि च जर्मन्यां फ्रांस देशे महा प्रभुः
२०. रचयामास गौड़ीयान् मठान् शत सहस्रशः
गौरांगा सशिखाः सोम्याः राधाकृष्णा नुरागिणः
२१. जयमालाऽलंकृतांगाः कृष्ण नाम परायणाः
जय देवस्य गीतानि गायन्तो धीर चेतसः
२२. वृन्दावनं समागम्य नृत्यन्ति ब्रज धामनि
रमणरेत्यां समारब्धं विशालं मन्दिरं महत्
२३. प्रभुपादोऽपि तत्रैव निजावासं चकार ह
प्रभुपादेन सम्मिलत्य साक्षात् करो मया कृतः
२४. प्रभुपादेन सर्वं हि वृत्तं पश्चिम देशजम्
स्नेहेन मयि सन्दिष्टं दश वर्षानु भूतिदम्
२५. भवताऽऽलोक्यतां संगः संध्याकालेऽत्र योगितः
गीतायाः वाचनं भक्तैः क्रियतेऽहर्निशं वने
२६. सत् संगः मया दृष्टः प्रभु पादेन योजितः
गौरांगा नृत्य लास्येन परिपूर्णो महावने

२७. पत्राणि मे प्रदत्तानि पाश्चात्यै श्चित्रितानि च
महार्घाणि प्रकाश्यन्ते कृष्ण लीलाऽन्वितानि च

२८. विश्वेऽद्य कृष्ण चैतन्य चेतना स्फुटिता भृशम्
ईराने चीन देशेऽपि गीतायाः पाठनं मुहुः—

२९. संजातं प्रभुपादानां चित्रै स्सह सादरम्
कृष्णस्य नाम सर्वस्वं तस्यवाक्यं श्रुतेर्वचः

३०. तस्य ध्यानं महाशान्ति स्तन्नाम स्मरणं यशः
अद्य वृन्दावने रम्ये यमुनायाश्चतटे शुभे

३१. रमण रेत्यां वसन्तीह गौड़ी मार्गानुयायिनः
द्विशतं तत्र भक्ताना मांगलानां हि दृश्यते

३२. तैरेव पूज्यते देवः तैरेवाराधनं कृतम्
तैरेव कीर्त्यते कृष्णः योरुपीयैश्च साधकैः

३३. अष्टाविंशति वर्षाणि मयोषित्वा व्रजांगने—
व्रज साहित्य संस्कृतेः रसास्वादः मया कृतः

३४. व्रज स्थली समाश्लिष्टा चैतन्य पथ गामिभिः
लीला भूमिर्जन्म भूमि वृन्दारण्य विहारिणः

३५. पदे पदे कृष्ण क्रीड़ा स्थाने स्थानेऽस्य गौरवम्
परिहृष्टं परोक्षदृशा चैतन्य वपु धारिणा

३६. तत् कालादेव वंगानां व्रजभूमौ महद्यशः
प्रसृतं प्रभुपादेन रक्षितं च पुनः पुनः

× × × × ×

# ब्रज गन्धा

१. ब्रज गन्धा मयाऽवाप्ता प्रेषिता भवता च या
तत् प्राप्त्यै वहुशः धन्य वादार्हास्स्युः प्रकाशकाः
२. अष्टाविंशति दर्पणि वृन्दारण्य निषेवकः
चक्रधारी सुशर्माऽहं निवसामि हिमाचले
३. ब्रज गन्धा मया दृष्टा पठिता सादरं पुनः
गीर्वाण्याः सुप्रसाराय कृत यत्ना प्रसीदतु
४. आनन्दी वाई सांक ब्रज भूम्या मुदार धीः
न्यवसत् कुञ्ज लालोऽसौ निम्वार्क पथ साधकः
५. वरसानायां ब्रजारण्ये षष्टि वर्षाधिकं तपः
तेपे कुञ्ज विहारी सः मम पितृव्य संज्ञकः
६. कैश्चित् संन्यासिभिस्साकं कैश्चिच्चैव सुवैष्णवैः
साधुभिर्दण्डिभिस्साक मस्माकं संगतिर्गता
७. वावा फूल गिरिर्दृष्टस्तत्रैव न्यवसन् मुदा–
गोस्वामी शरणाख्योऽसा वस्माकं गोत्रजः गतः
८. सारस्वत वंश्यानां द्विजानां सरणि र्मता–
क्वचिद् क्वचिद् ब्रजारण्ये दृश्यते श्रूयते पुरा
९. बांके विहारिणः सेवा शुश्रूषायां च स्वामिनः–
ये लग्ना स्तेऽपि सर्वेऽपि ह्यस्मद् वंश्याः सुकौशलाः
१०. मथुरा कीदृशी रम्या वृन्दारण्यं च कीदृशम्?
तत् सर्वं वर्णितं पूर्वमस्माभिर्निजयपत्रके
११. स्वामिनोऽखण्ड देवस्य ब्रह्मी भूते च पार्थिवे
लिङ्गे वेदान्तिनोऽखिन्नाः खिन्नाः भक्ति प्रसाधकाः

× × × ×

# भारते-हिमाचलः

१. हिमं पतति सर्वत्र शैत्येन पीड़िताः जनाः
उष्णानि परिधानानि मेवल्तेऽहर्निशं मुदा
२. ग्रीष्म कालेऽपि हैमानां वातानां वहनं सदा
भवत्यत्र तदाकर्ण्य माश्चर्य्य भारते जनाः
३. ष्टण्वन्ति ग्रीष्म धर्मार्त्ताः स्वेदेनाच्छन्न मस्तकाः
भारते षड् ऋतूनां च समवायः प्रवर्तते
४. उष्ण वन्द्येषु लंकाया मद्रासे ग्रीष्म सागरे
शैत्यं नाम किमस्त्यत्र जानन्ति नैव नागराः
५. नग्नैः पादैश्चलन्त्येके ग्रीष्मेणार्त्ताश्च दाक्षिणाः
अर्द्ध नग्न शरीरैश्च विचरन्त्यत्र भारते
६. राजस्थाने रजः पूर्ण श्चक्षुभि र्वाष्प पूरिताः
वर्षागमं प्रतीक्षन्ते वर्षाणि कतिचिद् भृशम्
७. पूर्वोत्तर प्रदेशेषु वर्षयन्ते जलोदराः
क्षणे क्षणे चिरापूंज्या मन्द्रुता भारती धरा
८. काश्मीरं फुल्ल पद्मांश केसरायित मारुतम्
तीव्रगन्धं—मनोहारि—यात्रीनां चित्त कर्षणम्
९. मुग्धय्या श्चित्रणं कृत्वा संसारे सभ्य नागराः
आत्मानं लेभिरे धन्यं सिने चित्र प्रदर्शकम्
१०. कलिकाताऽपि पूर्वीया वंग भूमि र्मनोहरा
लेभिरे जन्म विद्वांसो यत्र ठाकुर सदृशाः
११. पुरीयं जयदेवस्य गीतकानि प्रगायति
जगन्नाथोऽपि यत्रैव मेत्रिका मनु धावति
१२. दामोदरस्य कृष्णस्य दिव्यांशाः तत्र संस्थिताः
भक्तानामार्त्त गीतानि श्टण्वन्ति मधुराणि च
१३. कामाख्या पुरयेन् कामान् चिन्तिता क्लेश हारिणी

मासं मासं रजस्सूते प्रस्तरे खण्ड संस्थिता
१४. ज्वालामुखी क्षिपेज् ज्वालां प्रत्यक्षं दृश्य गोचरा:
साश्चर्य्यं पूरयेदत्र भक्तानां कामनां शुभाम्
१५. वासिष्ठे मुनि कुण्डेऽत्र द्रष्टव्यो जल संचय:
एकस्मिन्नेव संस्थाने शीतोष्णौ निर्झरौ गतौ
१६. यात्रीणां सुख बोधाय सत्र कारेण रक्षितौ
उष्णोष जल तोयेषु स्नानं कुर्वन्ति मानवा:
१७. पुनस्तत्रैव शीतौधै र्जनै: क्रीड़न्ति सादरम्
दादा नूरपुरी कुर्वन् भारतीय गुणाग्रहम्
१८. आत्मानं मनुते धन्यं षड् भाषानां प्रसारक:
द्राविड़े तामिली भाषा-तेलगु कन्नड़ नामिका
१९. महाराष्ट्रे मराठी स्याद् गुर्जरे गुर्जरी मता
वंग देशे च बंगाली: मलयाली मलयालये
२०. जम्बू खण्डे च विख्याता डोगरी माधुरी धरा
हिमाचले च बौद्धी स्यात् पहाड़ी पर्वते मता
२१. द्विशताधिक संख्याता: भाषा: ख्याता: हिमाचले
बहुभाषाऽऽकरो देश: बहुवेष मनोहर:
२२. भिन्न धर्मानुशायी स आर्यावर्त्त निगद्यते
नाना तीर्थ समाकीर्ण: नाना नद्युपसेवित:
२३. नाना वर्णा कृतिश्चाय मार्यावर्त्ता विकथ्यते
युगे युगेषु भिन्नानां संस्कृतीनां सहोदर:
२४. मातृवत् भ्रातृवत् सर्वं मनुते जगदव्ययम्
यदा पश्चिम देशेषु वन्या संस्कृति रेद्यते
२५. स्वर्णिम: काल अत्रासीत् वन वीथीष्वटवीषु च
गांगेयं यामुनं नीरं कृष्युत्पाद सहायकम्
२६. हिमालयाद् द्रवीभूय भारते प्रवहेद् भृशम्
भारतं संभरेद् विश्वे सर्वं संस्कृति संगमम्

× × × × × ×

# देशः कुत्र गमिष्यति ?

१. संस्कृतस्य समुद्धारः कथमत्र भविष्यति ?
कथमेनां देव गिरं भारतं चिन्तयिष्यति ?

२. संस्कृतस्य विनाशाय ह्यांगला ष्टोप धारकाः
प्रयन्तेऽत्र भू भागे संस्कृतेः रक्षकाः ध्रुवम्

३. संस्कृतस्य च विद्वांसो भिक्षान्न परायणाः–
दुर्गति प्राप्नुवन्त्यत्र वाल्मीकि व्यास सद्मनि

४. वेद त्रयी समाख्याता संसारे ख्याति मागता
अष्टादश पुराणानि षड् दर्शन युतानि च

५. स्मृतयो मुनिभिर्गीताः नय शास्त्र विचारिताः
भारते भारते ख्याताः नाना मुनि निरूपिताः

६. लक्षाधिकाश्च ये श्लोकाः भारते सन्निरूपिताः
नान्यत्र परिदृश्यन्ते कल्प कोटि शतैरपि

७. रामायणं निगदितं शत कोटि प्रविस्तरम्
नाना भाषोपबद्धं च नाना भाषोप बृंहितम्

८. रामायणं समाख्यानं सागरेण च धीमता
दूरदर्शन व्याजेन रामानन्देन भारते

९. दूरदर्शन चित्रं तत् सागरेण प्रदर्शितम्
रामायणं च तद् दृष्टं विश्वे दूर दर्शिभिः

१०. प्रशंसितं मुहुस्तत्र पूर्व पश्चिम दर्शकैः
सर्वकारस्य कर्त्तव्यं जायते भुवि भारते

११. संस्कृतं नामयद् द्रव्यं रक्षितं स्याद्धि भारते–
सुरक्षितं समतिष्ठेदद्य भारत मण्डले

१२. वैदेशिकाश्च विद्वांसो संस्कृते कृत चिन्तनाः
आदरं यत् प्रयच्छन्ति तद् गौरव प्रदायी च

१३. खेदः यद् भारते देशे संस्कृतस्य निरादरः
कुत्र यास्यति देशस्य वहु मूल्या सुसंस्कृतिः

१४. अद्य रोदिति काश्मीर रोदित्यद्य च भारतम्
अद्य रोदिति काशी सा संस्कृतस्य च रक्षिका

१५. ग्रन्थागाराश्च ये नष्टाः यावने राज्य विप्लवे
तेषा मुद्धरणायैव प्रयतन्त्येऽद्य सज्जनाः

१६. संस्कृतस्य या ऋद्धिः समृद्धि भारते गता
सा चायास्यति किं भूमः चिन्तनं महद्भुदतम् ?

१७. दादा नूरपुरी नित्यं चिन्तामाप दुरत्ययाम्
संस्कृतस्य समुद्धारः कथमत्र भविष्यति ?

× × × ×

# संस्कृतम् ?

१. संस्कृतं नाम गीर्वाण्याः विश्व ख्यातं धरोहरम्
अरक्षितं समातिष्ठेद् भारते निज सद्मनि

२. निरुपायाऽभवद् वाणी देवाना मियमद्भुता
निजागारेऽनाहृता स्याद् राज्ञी दासीत्वमागता

३. वाराणस्यां राज दुहिता विललाप यदा भृशम्
को वेदानां समुद्धर्त्ता, भारते भुवि तिष्ठति ?

४. तदैवैकेन छात्रेण गृहं प्रति गमिष्यता
श्रुता यदार्त्त वाणी तत्रैव सुस्थिरोऽभवत्

५. बाले! किमर्थमार्त्ता त्वं रोदिषीति गृहे निजे
कुमारिलो नाम भट्टोऽहं—वेदानु द्धरिष्यति

६. कुमारिलगिरं श्रुत्वा राजकन्या सुखं गता
प्रासादे सुखमापन्ना प्रसाद मध्य गच्छत्

७. कुमारिलश्च महोऽसौ वाग् वाण विद्ध मानसः
प्रतिज्ञाप्य निजागारे वेदोद्धारण तत्परः

८. सन्नद्धोऽभूत् वेदपाठी बौद्धागम विखण्डकः
बौद्ध गुरुं—गुरुं मत्वा बौद्धागममधीतवाम्

९. पुनस्तेनैव शस्त्रेण बौद्धागममखण्डयत्
वेदाचारं पुनर्भूमः भारते समघोषयत्

—अद्य—

१०. स्वतन्त्रे भारते चाद्य हयेका कन्या न रोदिति
अशीति कोटि जनसंख्या रोदितीति भयाकुला

संस्कृता संस्कृति जीता-स्वर्ग पाश्चात्य पीड़िता
११. दौर्भाग्यं खलु दौर्भाग्यं भारतस्य भविष्यति
मुष्टि मात्रा: जनाश्चाद्य शासनं चालयन्ति हि
१२. आंग्ला: कृष्ण वर्णाश्च संस्कृतेश्च विनाशका:
कोऽधीते भारते वेदं कोऽधीते शास्त्रसंचयम् ?
१३. कोऽधीते, भारते, रामचरितां संस्कृतोद्भवम्
भारतीया नभोवाणी संस्कृते यच्च श्रावयेत्
१४. तत् सर्वं नाशितं तेन दूरदर्शन कर्मणा
१५. दुश्चुखनं—दुरालम्भ: दुश्चक्रं दुष्ट भाषणम्
दृष्टव्यं प्रायशो नित्यं कन्या पुत्र समाकुले
१६. मातृ पितृ समाच्छन्ने सदनेऽहर्निशं मुदा—
लोपायितेशिखा सूत्रे लुप्ता—सुप्ता च संस्कृति:
१७. संस्कृतं च विलुप्तं स्याल्लुप्ता शासन पद्धति:
कृष्ण चेतनया, गीता—नीता चीने च पश्चिमे
१८. रामस्य चरितं चापि चीनी भाषा निरूपितम्
शंकराचार्य मिश्राणां चेतांसि विलयन्ति हि
१९. दृष्ट्वा दृष्ट्वा महाघोरं संस्कृते: पातनं महत्
विलपेदद्य दादाऽपि षड् भाषानां निरूपक:
२०. लेखन्या: क्रन्दनं श्रुत्वा सर्वकार दुराग्रहम्
हिमाचलेन गीर्वाण्या: पठनं पाठनं कृतम्
२१. तदस्ति शंसना भाग्यं शास्त्राचार विचारणे
देव भूमि रियख्याता—मेघस्य दूत वाहिनी—

मंस्कृते डाक्टरा: जाता: आंगली वेष भूपिता:
उपहास प्रकुर्वन्ति विदुपां प्राच्य धारिणाम्
मंस्कृते नैव भाषन्ते संस्कृतस्य न लेखका:
भृत्यकानां सहस्राणि लुण्ठन्ति निजपेतेन
ये चाद्या: वैदिका: विज्ञा: ते भिक्षा माचरन्ति
शास्त्राचारं प्ररक्षन्ति सर्वस्व न्यास तत्परा:
अहो भाग्य महो भाग्यं रक्षिता यैश्च संस्कृति:
मंस्कृत रक्षितं चैव क्षुत् पिपासा कुलैरपि
कुत्रा गच्छति चाणक्य: कणाद: कणभुक्कृत:
कृष्णो द्वैपायनो व्यास: वाल्मीकि: कुत्र धावित:
मोक्षर मुल्लर महोऽसौ शर्मण्यो गतवान् कुत:
मंस्कृतस्य सुरक्षायै दिल्लचामाचरन्ति हि
प्रदर्शनं–च विद्वांसो दौर्भाग्यं किमत: परम्
कृष्ण चेतनया गीता गीता पश्चिम मण्डले
चीनेऽपि चीन भाषायां प्रसार मधि गच्छति
भारते चित्रहारेण चरित्र मप हारितम्
अश्लीलं यच्च तत् सर्व श्लीलं ख्याति मागतम्
दूरदर्शन स्त्रोतेन—दूरे—दर्शन पातनम्

× × × ×

# भारतीया सेना

१. भारतीया महासेना संसारे ख्याति मागता
चतुर्युगेषु सन्नद्धा विश्वे शान्ति कारिणी
२. लंकायां विजितो राजा रावणो नाम विश्रुत:
द्वापरे कौरवा: जाता: संगरे मम मन्दिरम्
३. गुप्त काले मुगल काले बहव: सैनिका: मृता:
आंगलानां च राज्येऽपि सेनानां संचयो गता:
४. संसारे राज्य रक्षायै भूयो भूयोऽपि संगरे-
प्रथमे विश्व युद्धे च द्वितीयेऽपि समागता:
५. योद्धार: भारतीयाश्च पूर्व पश्चिम दक्षिणे
बंगाले वंग रक्षायै लक्षशो वन्दिन: कृता:
६. पाका: यावनिका: सैन्या: संन्यस्त शस्त्र संग्रहा:
त्रिवारं पाक देशेन भारते युद्ध कारणात्
७. पराजय: समाश्लिष्ट: सैनिकानां च सम्मुखे
गताह्वे च पुनर्लंका द्वीपेन प्रार्थना कृता
८. रक्ष, रक्ष, जलद्वीपं मुक्ति द्रष्टै: समाहृतम्
अस्माकं च पुन: सेना शान्ति रक्षण हेतवे-
९. रक्षिता स्तामिला: लोका: लंका द्वीप निवासिन:
अर्जितं च यशस्तत्र विश्वेऽपि कीर्ति संयुतम्
१०. गताह्वे माल द्वीपेऽपि दस्युभिस्तत्र सागरे-
लुण्ठने च समारब्धं वयमाकारिता: पुन:
११. होरा चतुष्टमे तत्र माल द्वीपस्य रक्षणम्
कृतं सेना समूहेन सागरे प्रति धावता
१२. मालद्वीपस्य राज्यं तत् पुन: शास्त्रे समाहृतम्
संसारे दुन्दुभिर्जाता विशाला भारतस्य च

१३. भारतीया नभः सेना जलसेना पदातिका
क्षण मात्रेण कुर्वेत् यत्र कुत्रापिवाञ्छिन्ता

१४. सियाचिने यशोलब्धं जम्बू खण्डेऽपि तत्पराः
सन्नद्धा मया दृष्टा चक्षुर्भ्यां तत्र संगरे

१५. कलारविण्ड ग्रामे यट्टैकानां भीषणो रवः
संजातः लोहपिण्डानां संघर्षस्तत्र दारुणः

१६. मुखय्या मत्र सेनाना मभ्यासो लोमहर्षकः
दृष्टः राजीव सेनाना मध्यक्षेन मही भृतां

१७. अस्माकमपि वाञ्छेयं समृद्धा रण वाहिनी
यस्मिन् ग्रामे वयं जाताः तत् सैन्यानां रण स्थलम्

१८. उच्चाधिकारिभिर्व्याप्तं समृद्धैः रण कामिभिः
अस्मिन् ग्रामे च सर्वेऽपि योद्धारः रण कौशलाः

१९. पाणौ प्राणान् प्रयुञ्जानाः जुहुवुः रण पण्डिताः
शस्त्राचार समाच्छन्नाः शास्त्राचार परायणाः

२०. ब्राह्मणा क्षत्रियाः वैश्याः निवसन्ति च शूद्रजा
सर्वे भ्रातृत्व मापन्नाः देश रक्षण तत्पराः

२१. प्राणान् तत्यजुर्युद्धे सेवा धर्म रताः सदा–
दादा नाम कविख्यातः शूर वृत्त सुलेखकः

२२. कुण्डली वृत्त मर्मज्ञः गीर्वाणी कृत चिन्तनः
यदा यदा व्याहरति छन्दो गुच्छान् मनोहरान्

२३. षड् भाषा गुम्फितं काव्यं यावच्चन्द्र दिवाकरो
प्राप्नोति शंसनां भूयः योद्धणां शंसने रतः

× × × × × ×

# शान्ति कुंजम्

१. गांगेय निर्मल पयः प्रक्षालितात्मा भारतीथी जल प्रपूर निषिञ्च्य माणः–
प्रेमाम्वुरपूर–स्रव–युक्त–जल–प्रवाहे कालिन्दिनी रविसुता विजयोपकण्ठे

२. गांगेय-यामुन समुत्थित संस्कृतौ च श्रीराम कृष्ण परिपूत दिगन्तराले
श्रीराम शर्म कृत ग्रन्थ विकास काले गायत्र मन्दिरमिदं विचकास्ति भूमौ

३. हिन्दू पुराण निगमागम सार भूतं कुंजं विधाय खलु शान्ति प्रदं न राणाम्
तेपे तपः स वहुवार मुदार चित्तः शास्त्रे विधाय रुचिरां निगम प्रतिष्ठाम्

४. नाना विधानि विरचय्य कथानकानि दैनंद्दिनं च परिकल्प्य निजात्म कर्म
आज्ञन् कुदुःख भरितानवलोक्य लोका नार्चायकः स वितनोति महच्च शर्म

५. स्वाध्याय यज्ञ निरतः लभते श्रमं न यः शास्त्र वान्हि परिचर्यन नित्य रक्तः–
ध्याने च सूक्ष्मकरणे परिपूत दृष्टिः निर्माण योजन विधौ परिकल्पितात्मा

६. शान्त्याश्रमे च वहुयाजन संप्रसंगे पूतः विहार मनुलभ्य तपः प्रपन्नः
गायत्र देव सवितुश्शरणं प्रपन्नः वहुशास्त्र लेखन रतः विलिखेदजस्रं

७. धारा प्रवाह् करगल्य प्रभूत भारं-भाविष्यकं च वरिवर्ति च वर्त्तमानम्
भूतं च विश्व घटना चक्रं समन्तात् पौर्वात्य पाश्चात्य विद्या निषेवितं

८. आख्यानकं च विदधाति क्षणे क्षणे हि सा तूलिका च विलिखेद्
भगवच्चरित्रम्
विरच्य नोपलभते खलु शान्ति मार्गं मघावद्यौ च यद्
मल्लिखितं सुपृष्ठम्

९. ऐतिह्य भूमिमवगाह्य वुधी प्रशस्त माश्चर्य्यमत्र मन्यत्र न
चाद्य जातम्
दृष्टाः मया प्रभूताः खलु लेखमालाः आखण्ड ज्योति–
युग धर्म विकास हेतोः

१०. संमुद्रितोऽनुलभते खलु वाग् विलासः गम्भीर चिन्तनयुतः
सुविचार युक्तः
प्राप्नोति तत्र मनुजः नहि तत्र हासः मामावराश्च वर मात्र
कृतानुरागाः

११. पश्यन्ति सत्य युग चिन्तित चिन्तकानि नाना विधानि
हर्म्याणि मनोहराणि
संसाधनैश्च रुचिरैः संसेवितानि दृष्ट्वाऽऽश्रमं च तत् सत्य
युगीन कायम्

१२. शान्तिं परां मुदमवाप्य च तत्र धीराः पांप समाप्य विनियम्य
च दोष जातम्
सत्त्वं च तच्च हृदये परिनिष्ठितं स्यात् चारित्र्य हानिरितरत्र
समाहृता स्यात्

१३. विश्वार्पिता च स्फुरिता लभते यशस्यं सा दूरदर्शन विद्या
सुधुनीति चित्तम्
रामायणं च स्रावितं खलु भारतेऽस्मिन् संचार दृश्य प्रसरे
प्रसृतं च भूम्याम्

१४. चारित्र्य हार मिदमद्य कदा न जातं माता-पिता च दुहिता
परिवेषितांगाः
द्रष्टुं न पार मनुयान्ति चरित्र हारं हं—हो! गतानु कगता
भवदीय वार्ता

१५. राज्यासनेषु कथमत्र विलासितेयं दृष्ट्वैव ताप तपनं लभते मनुष्य:
दादा कविर्वर्णयेद् वहु शास्त्र चर्याम्-षड् वाग् विलास निरत: ब्रजदाससक्त:

१६. हैमाचलीं निज भुवं वरदां प्रणम्य शान्त्याश्रमस्य चर्यां वितनोति भूम:
द्वारे हरेश्च परत: ऋषिकेश भूमौ स्वर्गाश्रम: स्वर्ग तुल्य गुणैरुपेत:

१७. यत्राश्रमा: मुनिवरै: संसेविताश्च गंगा प्रवाह जल घूणित चंचलांगा:
सवितुर्वरेण्य मिदमस्ति तप: प्रपूतं गीतालयाश्च विलसन्ति समग्र भूमौ

१८. दिव्य स्थली सुमधुरा-विश्व स्थलीयं रावी तटे च विजहार मनोरमेयम्

१९. जम्बू प्रदेश रुचिरा नृप राजधानी
ख्याता पुरा विजयते खलु सूर्य वंश्या
रामाश्व मेध्य तुरगै रति कान्त देशा
गायत्र यन्त्र जननी भुवि शोभतेऽद्य

२०. विश्वस्य मित्र मुनिराज तप: प्रपूता
देवस्य तस्य मर्ग: सुनियोजितोऽत्र
लब्धा इमे केचन पत्रका रुपि
ब्रह्मास्त्र–ब्रह्मवर्चस्व प्रहार दक्षा:

२१. लोमे विलोम विधिना सुविचार: युक्ता:
गच्छन्ति शत्रु निधने रवि मन्त्र वाणा:
पाद त्रयेण चलिता: रवि मन्त्र वाणा:
लोक त्रयेषु विहरन्ति यथा विहंगा:

२२. संहार धर्म निपुणैः पुनरापतन्ति–
मन्त्रै रमोघ बल वीर्य्य निपात दक्षैः
वर्णं श्चतुर्विंशति संख्यकै र्वृतः–
दादा चतुर्विंशति श्लोक संचयैः

२३. गायत्र मन्त्र मुद्घोषयतीति वार्ता–
प्रज्ञानते सुविदुषे श्रीराम शर्म–
शान्ति प्रदाय वितगामि त्रिपाद सूत्रम्

२४. विश्वस्य मित्र वासिष्ठ गते विवादे
सावित्र मन्त्र चलिताः खलु ब्रह्म वाणाः
जघ्नुर्वसिष्ठ तनयान् शत संख्यकांश्च
मेने पुनः स ऋषिराट् चर्च. प्रतिष्ठाम्

[परिशिष्ट श्लोकौ]

यज् ज्ञान चर्चनरताः जय पूत देहाः सेवा रताः सुविदुषः सुखमालयन्ते
अर्द्धांगिनी भगवती भगवत् स्वरूपा श्रीराम शर्म परिचर्यन लब्ध कामा–
दादा कवेरपि मता तन्नाम धन्या कृष्णानुराग निरता व्रजवास सक्ता
गोपेश्वरं व्रजपतिं सुषुवे सुतौ द्वौ संमुद्रणे प्रणयने विधियन हातो

× × × × × ×

# हुतात्मा वज़ीर रामसिंह पठाणिया

१. अत्रास्ति नगरं ऋद्धं नाम्ना नूरपुरं तु हि
तत्रासीच्च सुविस्तीर्णं बलेन रक्षितं सदा
२. तोमराणां नृपाणां हि सुविस्तीर्णं महाद्भुतम्
राज्यं वै भट सम्पूर्णं ऋद्धि सिद्धि समन्वितम्
३. तत्राभूद् राजमन्त्री सः रामसिंह प्रतापवान्
चकार नृपतेः सेवां सेनानां च निदेशनम्
४. आंगलानां प्रयापेच समस्तं भारतं ह्यभूत्
राज्येऽस्मिन्नपि संग्रामः आंगलैः सुनियोजितः
५. पिता वै शाम सिंहेन रामसिंहो प्रबोधितः
आगलै स्सह युद्धेन महती जायते क्षतिः
६. कोऽर्थं रक्तस्य पातेन त्यज पुत्र, रणांगनम्
वर्चस्वी रामसिंहश्च पितुर्वाक्यं न्यषेधयत्
७. पितृपाद! नयाम्येतान् गौरांगान् यमपत्तनम्
यावज्जीवामि करवाणि पितृणां रक्त तर्पणम्
८. योद्धृणां भारतीयानां स्वातन्त्र्य पथ गामिनाम्
ऋणान् मुक्तिं प्रदास्यामि करोमि युद्ध मुल्वणम्
९. सप्तसागर सीमान्तां पृथ्वी मुल्लङ्घ्यदस्यवः
त्रिविशु भारतं वर्षं वणिजः कूट चेतसः
१०. लुण्ठिताः लघुराजानः सम्राजश्चापि लुण्ठिताः
घातिताः क्षत्रियाः धूर्तैं मर्दिताः बुद्धि जीविनः
११. श्रेष्ठिनः लुण्ठिता स्सर्वे द्रव्यं तद् लन्दने गतम्
कारायां पातिताः वीराः काला पान्यां च प्रापिताः
१२. कण्ठ लग्नेन पाशेन बहवः मृत्युमाप्नुवन्
न सोढ़ं रामसिंहेन राज्यं वैदेशिकं खलु
१३. रामसिंहस्य कम्पन्याः संघर्ष स्तदाऽभवत्
यदैव कम्पनी राज्यं स्वाधिकार मघोषयत्

१४. राम सिंहेन कम्पन्या: वाहिन्यो भस्मसात् कृता:
ग्रामे ग्रामे च दुर्गेषु नदीनां प्रस्तरेष्वपि
१५. वनेषु वनखण्डेषु तुमुलं युद्ध मारभत
चण्डी प्रख्येन खड्गेन शत्रवो धूलिसात् कृता:
१६. एकाकी राम सिंहश्च शत्रवो लक्ष संज्ञका:
घातेन प्रतिघातेन शत्रवो मृत्यु मान्पुवन्
१७. दुर्ग भगं निरीक्ष्यासौ राम सिंहोऽरि सैनिकै:
जम्बू प्रान्तं गतस्तत्र सैन्य, गठन, हेतवे
१८. सैनिकान् शतश स्तभं गाठित्वा डोगराह्वयान्
प्रत्याक्रान्तं कृतं दुर्गं शाह पुराह्वयं तदा
१९. डोगराणां च संघर्ष दृष्ट्वा वैदेशिका: खलु
मस्तके चरणौ धृत्वा दुर्गात् तस्याच्च दुद्रुवु:
२०. खण्डश: शत्रवो जाता: भग्न ग्रीवाऽस्थि कन्धरा:
रुधिराक्रान्त देहाश्च रावी नद्यां निमज्जिता:
२१. शत्रूणां प्रावणं दृष्ट्वा रामसिंहेन धीमता
राज्यीया निज दुर्गे हि स्वातन्त्र्य घोषणा कृता
२२. कम्पनी गुप्त सूत्रैश्च, वारनो, विनिवेदित:
राम सिंहेन विद्रुस्य स्वातन्त्र्य घोषणा कृता
२३. पंजाबे कम्पनी सेना सन्नद्धा वल शालिनी–
द्वन्द्वाघातं पदाघातं कराघातं च संगरे–
२४. तत्रापि शतश: शूरा: रणे जग्मुर्यमालयम्
पुनराक्रम्य दुर्गेऽस्मिन् संघर्षे निरतोऽभवत्
२५. असंख्य सैनिकैस्तत्र दुर्ग भंगो यदा कृत:–
रामसिंहेन वीरैश्च दुर्ग त्यागस्तदा कृत:
२६. तुमुलं च महद् युद्धमांगलै: समपद्यत
पुनश्च रामसिंहेन गोरिल्ला नाम संगर:
२७. वीरै: सह समारब्ध: वन वीथीस्वटवीषु च
चण्डी घातेन मुण्डानि शत्रूणां भुवि शेरते

२८. एकाकी रामसिंहश्च शत्रवो लक्ष संख्यका:
लन्दने च महाराज्ञया: शासनं च तदाऽभवत्
२९. राज्ञया: निकट वंशीया: सेनाधिपतस्तदा–
युयुधु: रामसिंहेन पद लोभेन मोहिता:
३०. तेऽपि चण्डी प्रहारेण शिरश्छित्त्वा निपातिता:
वारनाख्यो प्रान्त पाल' वृत्तं तद् दूर भाषत:
३१. राज्ञयै विक्टोरियायै च लन्दने प्रति प्रैषयत्
कम्पनी शासका: क्रुद्धा: गौरांगा: कपट चेतस:
३२. रामसिंहस्य बन्धाय कोटिश: यत्न माचरन्–
क्रुद्ध: सिंहो भ्रमन् रात्रौ सेनानां शिविराणि च–
३३. ध्वंसयामास निर्विन्ध मेकाकी वन केसरी
एकदा निविडे श्रीरे 'डलधारा' स्थले सुधी
३४. ईशचिन्ता निमग्नश्च सन्ध्या वन्दन तत्पर:
'फत्तू' नाम्नाऽतिनोचेन गुप्त सूत्रेण सूचित:
३५. निबद्ध: कम्पनी दूतै: कलिकातां च प्रेषित:
आंगलानां निदेशेन मृत्यु दण्डेन घोषित:
३६. पुर्नदण्ड विचारेऽसौ काला पान्यां, च प्रेषित:
सिंगा पुरस्य निर्वास व्यदधु न्ययिपालका:
३७. तत्रैव पंचभूतेषु पंच भूतानि विसृजम्
तत्याज मानुषं देहं स्वात्मारामोऽरि सूदन:
३८. वासा वजीर ग्रामेऽद्य तद्वंश्यरैनु रक्षितम्
चण्डी–खोगा–लोहवर्म–वारकव्य विभूषितम्
३९. नोटंक्यामपि तद् वृत्तं वर्तते लोक भाषितम्
गीतं चर्चित पूर्वं हि चक्रधारीति शास्त्रिणा
४०. रामसिंह वजीरोऽसौ त्रैगर्त्त भू विभूषणम्
सुसरलैश्च पद्यैश्च बहुभाषासु कीर्त्तित:

× × × × × ×

# भूचालः

१. कांगड़ेऽस्मिन् समारब्धः भूकम्पस्तु भयानकः ।
कम्पते भूः विशाला सा पापाक्रान्ता पुनः पुनः ॥
२. धर्मशाला भागसूश्च चेतड़-दाड़िका पुरी ।
त्रेपन्ते भुवि भारेण कम्पन्ते वनवाटिकाः ॥
३. भग्ना विद्यालयाः केचिद् भग्ना देवालया अपि ।
भग्नानि गृहकोष्ठानि मृत्तिकानिर्मितानि च ॥
४. कृषिर्नष्टा विनष्टाश्च ग्रामाः कम्पप्रपीड़िताः ।
गावो वत्सा महिष्यश्च व्याकुला भुवि शेरते ॥
५. बाला वृद्धा युवानश्च यत्र तत्र प्रधाविताः ।
त्राहि त्राहीति त्राहीति क्रन्दमाना इतस्ततः ॥
६. केचिच्च पतिता गर्त्ते केचिन्नद्यां निमज्जिताः ।
हिम-मण्डित-शृङ्गेभ्यो वात्यां-चक्रेण चाहताः ॥
७. सुप्ताः सुप्ताः चलन्तश्च शिरोभागेन खण्डिताः ।
वहन्तो रुधिराश्रूणि वमन्तोऽसृग् मुहुर्मुहुः ॥
८. सर्वकारेण संवीक्ष्य जनतायाः प्रपीड़नम् ।
समारब्धा योजनैका पीड़ितानां कृते पुनः ॥
९. काष्ठानि सम्प्रदत्तानि गृह–निर्माण–हेतवे ।
दरिद्रेभ्यो धनं दत्तं भोज्यं भक्ष्यं च भूरिशः ॥
१०. आवासानां च वीथीनां नवीनीकरणाय च ।
वज्रचूर्णस्य चेप्टीनां प्रदानं बहुशः कृतम् ॥
११. कोटयो रूप्यकाणां हि केन्द्रेणाप्यर्पितानि च ।
शासनाय च राज्यस्य नवजीवन–हेतवे ॥
१२. त्र्यशीतिवर्षपूर्वं यो भूकम्पोऽत्र समागतः ।
लक्षशस्तत्र जीवानां निधनं समपद्यत ॥

× × × ×

# मीरापूजिता श्रीकृष्णमूर्तिः

१. राज्ञा नूरपुरीयाणामासीदेकं पुरातनम् ।
दुर्गं दुर्लभ–चित्राणामाकरं भुवि विश्रुतम् ॥

२. तत्रास्ति विग्रहः साक्षात् मीरायाः गिरिधरस्य च ।
राज्ञा जगत सिंहेन राजस्थानादुपाहृतः ॥

३. पूजितो मीरया चैव भक्तिभावेन सर्वदा ।
राज्ञो जगतसिंहस्य स्नेहान्न त्रोटितस्दा ॥

४. मुगलेनावरंगेन जीवपूर्वेण वैरिणा ।
भीतभीतः सदासीद्धि जगत्सिंह–बलादयम् ॥

५. विग्रहः कृष्ण–वर्णोऽयं दुर्गमध्येऽद्य तिष्ठति ।
राज्ञां नूरपुरीमाणामन्यानि मन्दिराण्यपि ॥

६. धर्मतालेऽथ हाड़ायाः ग्रामे ख्यातिमवाप्नुवन् ।
हाड़ा ग्रामः चक्रवत्याः नद्याः किंचिच्च दूरतः ॥

७. पुरुषोत्तम–रायस्य नाम्ना देवेन शोभितः ।
सिद्धैः संसेवितः पूर्वैः 'भारती' नामधारकैः ॥

८. धर्मतालेऽपि रामस्य सीतालक्ष्मणसंयुताः ।
प्रतिमाः प्रतिपूज्यन्ते भूपालाश्रितवैष्णवैः ॥

९. दुर्गाकारं महाकारं मन्दिरं वीक्ष्य साधकाः ।
परमां तृप्तिमायान्ति स्त्री-शूद्र-द्विज-क्षत्रियाः ॥

× × × × × ×

# देव भूमि हिमाचलः

[वसन्त तिलका छन्दसि]

१. मौर्म्यहिमाचल द्रुमैः परिवेश्टितात्मा
शैलाधिराज गिरि भूमि कृतावतारः
मिश्रै द्विजन्म भरितैः रुचिरः प्रदेशः
हैमाचलः स्थिरगति वितनोति सारम्
२. मिश्रोद्भवैः कौशल गोत्रजै द्विजैः–
सान्निध्यमाप्य द्विज गोत्र धरीण नामा
ख्यातः पपाठ श्रुति शास्त्र समस्त तत्त्वं
काश्या मुवास कतिचिद् वर्षाणि तत्र
३ तस्यात्मजः कुल गुरुर्द्विज क्षत्रियाणां
ख्यातः वभूव जनकः मम मल्लु रामः
तस्यात्मजै र्नवविधैः परिलब्ध कीर्त्तिः
शास्त्री वभूव खलु चक्रधरो यशस्वी
४. षड् वाग् विभूषित करो–
वहुवाग् विवादी शास्त्राण्य धीत्य
विचचार व्रजे मनस्वी
तत्रैव कृष्ण चरणे कृत सम्प्रयोगः
५. नेपे तपः त्रिदशकं खलु वृन्द भूमौ
कृष्णेन तस्य प्रियया ननु राधया च
लब्धादरो प्रयतते खलु काव्य गानम्
यद् यच्च यच्च लिखितं विविधैश्च वृत्तै
६ तत् सर्व मेव फलदायी वभूव काव्यम्
अद्यावधौ न विरराम च तूलिका सा
कृष्णेन रासरसिकेन च प्रेरिता या
'रस चन्द्रिका' विरचिता खलु भाव भूमौ
वृन्दावने च विहरामि-लिखामि-यामि
७ आनन्द कानन वने निवासिम रात्रौ
पश्यामि कृष्ण चरितानि मनोहराणि

रासोत्सवः स्थल जलेष्वटवीषु जातः-
दृश्यावली हृदय कर्षण दर्शनीया
८. रासोत्सवे च कृष्णस्य मनोरमानि
श्रव्यानि सूर, मीरा, नव गीतकानि
ताथेई-थेई-नट-नाट्यं-कलाऽन्वितानि
नृत्यांगना व्रज विहार रसे-रतानि
९. दृष्टाः मया व्रज निवास विहार काले
वृन्दाटवीषु कुच कुंभ घटैः सुसज्जाः
अद्याऽहमत्र निवसामि हिमाचलेऽस्मिन्
या देवभूमि पुरतूर, सुसज्जिता स्यात्
१०. रामस्य राज्य मपरत्र च यत्र तत्र
देवाधि देव-रण-भूमिरिम प्रसिद्धा-
वाणासुरो निज सुतां पति कामुकां तां
दत्त्वा शुभां च सुभगां च मनोरमां च
११. कृष्णेन युद्ध निरतः विरराम तस्याद्
क्षेमं चकार कुशलं निज वान्धवानाम्
ऊषा प्रदत्तवर माल विभूषितांगः
कृष्णान्वये स भद्र भूषण कौरवारिः
१२ द्वारावतीं च विचचाल सुसैन्य सज्जः
हैमाचलाद् गिरि गुहास्वटवीषु रुद्धः-
हैमाचले जनपदे यदि शैव-दुर्गा-
पीठानि सन्ति विविधानि मनोहराणि
१३. ज्वालामुखी-सुनयना-खलुखिन्नमस्ता
वज्रेश्वरी च वहु चण्ड विदारिणी च
भूयोऽपि सन्ति खलु वैष्णव पीठकानि
नारायणेन खचितानि विचित्रितानि
१४. गोविन्द गीत, चरितानि सुसज्जितानि
चित्राणि विश्व चित्रावलि चित्रितानि
दृश्यानि-भाव-वहुलानि-मनोहराणि-
हैमाचलीय गिरि-गह्वर-दुर्लभानि।

× × × ×

# सती नील देवी

१. क्षत्रियाणां पुरा राज्यमासीदस्मिन् हिमाचले–
हिम तुंग समारंभे तोमराणां शुभालये
२. तत्रासीत् सूर्य देवाख्यो नृपति धर्मं तत्परः
नील देवी महाराज्ञी नृपते र्महिषी ह्यभूत्
३. नीलदेव्याः गुणाख्यानं सौन्दर्य्यं श्रवणं तदा–
यवनेन प्रान्तपालेन 'सूरेण' हृदि धारितम्
४. कथमेनां वरारोहां नृपतेर्ललनां वराम्
प्राप्नोमि कोटि यन्त्रेन चिन्तामाप्नोद् दुरात्म धीः
५. दुर्ग भंगं विद्यामैव मनसः कामनां लभे–
मत्वेति तत्र दुर्गे च 'सूरेण' कटकं कृतम्
६. खानस्याद्य : शरीफस्य सेनायाः वीक्ष्य पातनम्
सूर्यदेव भरें दुर्गे युद्धस्य घोषणा कृता
७. केसरी वस्त्र सन्नद्धैः क्षत्रियैं खड्ग धारिभिः
यवनस्य चपूः क्रान्ता वारणाश्व पदातिभिः
८. तुमुलं च महद् युद्धं यवनै स्समपद्यत
यवनाः भग्न सर्वांगाः भग्नास्थि भग्न कन्धराः
९. दुर्गान् नगपुराच्छीघ्रं पुनश्चक्रुः पलायनम्
ध्वस्त सैन्येन खानेन पुनः सेना समाहृताः
१०. समाक्रान्तं तदा दुर्गं प्राप्तुं तां रमणीं खलु
यवनैः सूर्य देवोऽसौ राजा बद्धः प्रतापवान्
११. लोह पंजर मध्येऽसौ कारागारे निपातितः
खानेन तत्र सूरेण विजयस्य घोषणा कृता
१२. मन्त्रिभिः सैन्य गुल्मैश्च विजयोत्सव करक्षिभिः
दुर्ग मध्ये विशालैका सभा संयोजिता तदा

१३. मदिरा पत्र संसिक्ता-कुक्कुटामिष संभृता
नील देव्याऽपि दुष्टस्य दुष्ट नीति विचादिता

१४. नर्त्तकी रूपमासाद्य वादकै: वाद्य यन्त्रकै:
सूरं प्रस्तावयामास नृत्य क्रीड़ा प्रदर्शनम्

१५. कामान्ध: सूर खानोऽपि प्रस्तावं स्वीचकार ह
समारब्धं कला नृत्यं विविधै र्गीत वादनै:

१६. नृत्यं नृत्यांगनां दृष्ट्वा सूरखानो मुमोह च
निजासने समाहूय चुम्बना कुलितोऽभवत्

१७. नीलदेव्यास्तु खानस्य दुष्टयाचरणं यदा
गुप्तं सुगोपितं खड्गं तीव्रं हस्त गतं कृतम्

१८. खड्गस्यैक: प्रहारस्तु खानस्य हृदि पातित:
द्वितीय: मुख मध्ये तु दत्त्वा देवी ह्यभाषत

१९. चुम्ब त्वं दुष्ट! खड्गं मे नील देव्या: प्रपातितम्
खड्गस्यौग्रै: प्रहौस्तु सूर: पंचत्त्व मागत:

२०. सभागारस्तु युद्धस्य घोरं रूप मधारयत्
पंचरस्थस्तदा सूर्य: पत्न्या: नृत्येन कम्पित:

२१. क्रुद्ध: पंजर भंगं च व्यदधाच्च रणांगने
तुमुलं द्वन्द्व युद्धं च सभागारे तदाऽभवत्

२२. पंजरे लोह दण्डने शतश: रिपवो हता:
सूर्यदेवेन क्रुद्धेन यत्र तत्र निपातिता:

२३. द्वन्द्वाघाते समारब्धे सूर्य देवस्य शत्रुणा
खड्गस्यैकेन पातेन शिरश्छिन्नं दुरात्मना

२४. सूर्य देवस्य पातेन नील देव्यंग रक्षकै:
सैनिकैस्तत्र सन्नद्धै: भवना: खण्डश: कृता:

२५. नील देव्या: निज: पुत्र: सोमदेव: प्रतापवान्
राज्यासने समादिष्ट: स्वयं च विरताऽभवत्

२६. पत्युश्च सूर्यदेवस्य शिर: क्रोड़े निधाय च
तत्रैव दुर्गमध्ये सा समीत्त्व मावृणोत् मुदा

२७. प्रान्तपाल: प्रजाघाती हिन्दू धर्म विनाशक:
खानश्चाद्वु: शरीफोऽसौ नरकाय गतस्तदा

२८. वृत्तमेतद्धि विद्वद्भि र्वणितं पूर्व वर्तिथि:
भारतेन्दु र्महा भागो हरिश्चन्द्रो विचारक:

२९. नाटकं नील देव्यारव्य रचनामास भारते
कल्याणस्व च नार्यङ्के नीलदेवी कथानकम्

३०. वर्णितं दृष्टम म्यामि रन्यत्रापि च कीर्त्तितम्

३१. मार्ग दिश्यात् सदा देवी पुण्य श्लोक महाव्रता
चक्रधारी सुशर्माऽहं क्षत्रियाणां पुरोहिता
त्रिभाषा वर्णितं कुर्यात् नील देवी कथानकम्

३२. पूर्व हिन्दी पद्य वद्ध-पश्चात् संस्कृत मुद्रितम्
पहाड़्यां कीर्त्तितं भूय: कथा रागेण चर्चितम् ।

× × × ×

# –संवित्–

१. पंचभूतात्मके देहे संवित् सत्त्वविधायिनी–
संवित्–चेतना–ज्ञानं–संवित्–जीवनस्य कारणम्
२. संविदा जायते घ्राणं–जन्तूनां क्षुद्र देहिनाम्
संविदा कच्छप: ज्ञानं लभते नीर मिश्रितम्
३. संविदा मक्षिका सूते–मधुरं मधु संचितम्–
संविदा वालक: मातु: कुरुते च दुग्धाशनम्
४. संविदा जन्तव: नीरे क्रीड़न्ति मत्स्य कच्छपा:
पिपीलिका प्रकुरुते घ्राणेन भोज्य संचयम्
५. नीरे क्षीर विभाग: स्यात् संविदा हंस संभव:
हस्तिन: निज शुण्डेन जलमादाय भूरिश:
६. स्नान्ति-यान्ति प्रहृष्यन्ति-चालकेन प्रभाविता:
कोकिला: स्वशिशून् काक नीड़ेषु पालयन्तिहि
तत्र ते जीवनं लब्ध्वा-जीवनं धारयन्ति हि
हरिणा: गीत संमुग्धा: विस्मरन्ति निजा: क्रिया:
७. काल पाश निवद्धास्स्यु: निजया संविदा युता:
प्रात: काल: समायात: क: सूचयति कुक्कुटम् ?
८. पक्षिण: चटकान् सुप्तान् को वोधयति सत्त्वरम्
इटङ्ग प्रहरन्त्येते जंगमा: पशवो भुवि–
९. मित्रता–शत्रुता–केन शिक्षिता ? संविदा ध्रुवम्
भूचालस्य –निदाघस्य—शैत्यस्य ज्ञान सूचना
१०. क: संयच्छति जीवेभ्य: ये भीता: भुपि शेरते
कुक्कुरेभ्य: मयूरेभ्य: सारिकाभ्यश्च भारते
११. मानवानां स्नेह भूमिं क: शिक्षयति प्राणिन:
गोधनानां सहस्रेषु वत्सो विन्दति मातरम्–
१२. अन्येऽपि पशवो यान्ति गन्तव्यं निशिवासरे
नीड़ान् निजान् प्राप्नुवन्ति क्रीड़न्ति निजवालकै:
१३. कुक्कुराणां स्वामि भक्ति: संसारे भुवि विश्रुता
प्रणानपि प्रयच्छन्ति किमाश्चर्य्यमत: परम्

१४. चटका: कृष्ण वर्णा: या: मृत्तिका नीड़ माश्रित:
आकाशाज् जीव जन्तूनस्ता: निगृह्य नीड़ माश्रितान्
१५. निजान् शिशून् भोजयन्ति क्रमशश्च वुभुक्षितान्
सा भूमिं न स्पृशति चटकाऽऽकाश चारिणी
१६. पोषयेच्चनिजान् वतान् जीव जन्तु विलासिनी
मूषिक: विलमाश्रित्य विडालाद् भय मास्थित:
१७. विभेति—पुनराक्रम्य चौर्य्यं प्रकुरुते भृशम्
गृध्रा: गिरि श्टङ्गानां गह्वरेषु समाश्रिता:
१८. मृतान् वीक्ष्य शवान् दूरात् संघै भंक्षयन्ति हि
पुनरुड्डीय तत्रैव गह्वराना श्रमन्ति हि—
१९. वानरा: मानवाकारा: मनु तुल्य पराक्रमा:
कूर्दन्ति तरु श्टङ्गेषु हस्तै: पादै: समन्विता.
२०. लांगूलानां करावार्त: पोज्यन्ते वन चारिण:
भक्षयन्ति फलान्यत्र गृहेभ्य: रोटिका अपि
२१. सर्प कर्ण विहीनोऽपि श्टणोति शब्द संचयान्
इंगितै: स च सर्वज्ञ: वल्मीक मधितिष्ठति
२२. जलौकोभय लिंगांगी जल मध्य विहारिणी
दूषितं रक्त मश्नाति मृदं भक्षयति पुन:
२३. महिषा: शूकरा: गाव: सर्वे संविद् प्रयोदिता:
स्वां स्वां योनि मापन्ना: संविदश्चित्रणं महत्
२४. आकाश चारिण स्सर्वे वनारण्य विहारिण:
सागरे लब्ध संस्थाना: संविदेश्चत्रण महत्
२५. चक्रवाक: वियुक्त: स्यात् पत्न्या निशिवासरे—
प्रातरागम्य मिलति संविदा सं प्रयोदित:
२६. उलूक: निशि कालेऽसौ हर्षोत्फुल्ल लोचन:
सूर्योदये विषादेन पीड़ितो जायते कथम् ?
२७. एकेनैवहि नेत्रेण काक: सर्वं हि वीक्षते
चंचलायित नेत्रोऽसौ क्षणादन्यत्र गच्छति
२८. श्राद्ध काले समाहूता: वलिमादाय संघश:
इतस्तत: प्रधावन्ति पितृणां श्राद्ध भोजने

२६. सिंहा श्चित्रकाः नैव भुंजते कन्दमूलकम्
मांसाशिनः प्रकुपिताः घ्नन्तिप्राणिनः ध्रुवम्
३०. कस्तूरी गन्ध हरिणः कस्तूरी गन्ध लोलुपः—
गन्धं निजं न जानाति कुत्रास्ति तन्निरूपितम्
३१. नकुलः सर्पमश्नाति खण्डानि तस्य कारमेत्
चौर्य्य रूपेण नकुलः दुग्धान्नान्यपि भक्षयेत्
३२. मधु संचय संलग्नाः मक्षिकाः संघशः युताः
राज्ञीं निजामनुसरन्ति—तदादेश प्रधाविताः
३३. पुरुषाः निखट्टवस्तेषां गृह रक्षण तत्पराः
तत्रैव परिरक्षन्ति—खादन्ति च रमन्ति च—
३४. शत्रून् विदारन्त्येते मधु संचय लुण्ठकान्—
दंशं निजै दृढं दृष्ट्वा धरण्यां पातयन्ति हि—
३५. वृश्चिकाः जन्म संप्राप्य वृश्चिम्याः जठरात् पुनः—
मातुर्देहं भक्षयन्ति स्वोदराणां प्रपूरणे—
३६. शुकः पठति मन्त्राणि संविदा प्रेरितानि च—
'राम' नाम पुनर्ध्यायेत् पंजरस्थ उठार धीः
३७. आश्चर्य्यं महदाश्चर्य्यं जगत् स्थावर जंगमम्
दादा नूरपुरी कुर्यात् संवित् सर्वेक्षणं मुदा—
३८. यूका मत्कुण-मशकानां तिमिरे रुधिराशिनाम्
कः शिक्षकः भवत्यत्र संवित्तत्र कारणम्
३९. संवेत्ति संविदं धीरः संवेत्ति चेतनां पराम्
रस सिद्धः स जायेत संवित् सिद्धः परः पुमान्
४०. सिद्धैः संसाधिताः नूनं राजयोगाः परात्पराः—
हठ योग समाच्छन्नाः सिद्ध मार्गानुयायिभिः
४१. अखण्डानन्द देवस्य गुरोश्चैतन्य रूपिणः
कृपया परमाविष्टः दादा वृत्तमिदं जगौ
४२. षट् चत्वारिंशत्तमे वर्षे वैशाख्यां प्रथमेदिन
अप्रैल ख्रिष्ट मासाद्धे संवित् वृत्त मुदीरितम्

× × × × × ×

# हिम धरा

१. जलाशयैः प्रपूरिता धरेय मुर्वरा धरा—
हिमाचलीय राग—रंग—रंजिता मनोहरा
२. क्वचिन् क्वचिद् धरेय मद्भुत समुन्नता मही—
क्वचित् क्वचिद् विशाल वज्र खण्ड मण्डलाश्रिता
३. हिमैः समुज्ज्वला सुशोभते भुभालः पट्टिका
सरोवरै मनोहरैः प्रफुल्ल केशरान्विता
४. निर्झरैः प्रवाहितै विशालः भूमि मण्डला
शतद्रुणा-विपाशया-च चन्द्र भागयाऽङ्किता
५. कलिद्रजा प्रवाह युक्त चम्पकैः सुशोभिताः
लवंग युक्त गुर्जरा समूह भाण्ड संयुतैः
६. समुन्नैतः पयोधरैः सुदुग्ध विक्रमे रताः
क्वचित् क्वचिन्नि लम्बमान चोलडोर संयुताः
७. अजा समूह मध्यगाः चलन्ति गद्दिनः सदा
भयावहैश्च कुक्कुरैश्च क्रीह्यमान शावकाः
८. व्रजन्त्यध धरातले हिमेन पीड़िता तदा
उदीयमान आतपे सुताप तप्त भूतले
९. पुनश्च यान्ति पर्वते-अजा समूह मण्डिताः
जटा कटाह गायकः—सुवैद्यनाथ सेवकः
१०. तपः प्रतप्तुमीहने हि रावणः हिमाचले
सात्त्विकी— सुसौष्ठवा— -सुमंगलीह—-चण्डिका
११. धरा धरेन्द्र नन्दिनी—विराजते धरातले
छिन्न मस्तका-त्रिनेत्र धारिणीह वैष्णवी—
१२. सुशोभते विराजतेऽत्र नाग नागिनी युता
नदी नदाः सरांसि सत्त्व भाव युत मनांसि च
१३. शुकाः पिका भ्रमन्ति कलरवेण यान्ति यान्ति च
१४. वसिष्ठ व्यास परशुराम मातृ भू वसुन्धरा
विशुद्ध नीर संचये तरंगिता सुरेणका
१५. सहस्र वाहु छेदने नृमुण्ड कर्त्तने परा
विपक्ष पक्ष ध्वंसने सदैव भाति तत्परा

१६. पाण्डु पुत्र शिक्षिका द्रोण शिक्षण स्थली
कदा कदाऽपि जायते यावनी रण स्थली
१७. शताधिकै विलुण्ठिता-मनोरमा सुर स्थली
पुनः पुनः निजं स्वरूप मास्थिता वन स्थली
१८. सर्वप्रकार रंजिता स्वराज्य सैन्य सज्जिता
मुहुर्मुहु विराजते समग्र विश्व वन्दिता
१९. विनीत नम्र मानवैः पदे पदे ह्यलंकृता
पर्वतीय गीत–वाद्य वादनैश्च अंकृता
२०. गोपबाल बालिका समूह नृत्य चंचला
क्वचित् क्वचिच्चलेद जस्र देव नाटयं शृंखला
२१. ग्राम्य देवता समूह मेलकै विजृम्भिता
सदभ्रबिन्दु पातेन सदैव शस्य श्यामला
२२. कदा तडित् प्रपातेनन भीषणा प्रकाम्पिता
भूविकम्पनेन भूरिशो यदा जनाः मृताः
२३. यदा कदा हि दैविके प्रकोप भाजने गता
तपस्विनामियं धरा मनस्विनामियं धरा
२४. यशस्विना मियं धरा—यशोधरा—वसुन्धरा
सुबुद्ध बौद्ध मार्गिणा मियं तपः स्थली मता
२५. शैव–शाक्त–नाथपन्थ वैष्णवैः समर्चिता
अरण्यजै वनौष धीभिरत्र भारतेर्ऽपिता
२६. ऋक्ष–बाघ–केसरी द्विजन्म जीव संकुला
विकासमान सर्वकार योजनाऽपि स्वीकृता
२७. ऋद्धि–सिद्धि वृद्धये विकास सूत्र संल्पुता
तड़िद् विकास योजनाः हिमाचले विकासिताः
२८. सुशिक्षणे प्रशिक्षणे प्रवर्द्धिताः निजालयाः
अशिक्षितेषु मण्डलेषु शिक्षकाः समाहृताः
२९. आम्र-सेब-आलू जाति संग्रहे सदोद्यता
कृषिप्रसार रक्षणे भवेत् सदैव व्याकुला
३०. जले-स्थले समुद्र जन्म संगरे निरापदा
प्रचण्ड-दुष्ट-दैत्य-दानव क्षेय भवेद् रता
३१. असंख्यकै निरूपिता—सुकाव्य गीत—गायकैः
मयाऽपि कीर्त्तिता पुनः हिमाचली वसुन्धरा

× × × ×

# तोमराणां जयोत्सवः

पूर्वमासीत् प्रतिष्ठाने शास्ता कुजवक खानकः–
१. पांचाले चक्रवत्यास्तीरे राज्यं चकार ह
एकस्मिन् दिवसे खानः तुरगारूढः जगाम ह
२. मार्गे पादात् विनिष्क्रांतो पानद् भूमौ पपात च
खानः सम्मुख मायान्तं द्विजमेकं ददर्श च
३. चक्रावत्यां कृत स्नानं गृहं प्रति समागतश्
द्विजमाहूय खानोऽसौ गर्वेणादिष्ट वान् तदा–
४. उपानहं निजे पादे पातय त्वं द्विजोत्तम
खानस्य भर्त्सनं श्रुत्वा सैन्यानां च दुराग्रहम्–
५. पण्डितः कौशलः घोरे संकटे समपद्यत
उपानहं प्रदास्यामि तदा धर्मो विनश्यति
६. नो चेद्दुष्टः नवाबोऽसौ भीषणं दण्डयिष्यति
सुविचार्य दृढ़ भूयः मानसे कृत निश्चयः
७. उपानहं खान पादे कौशलः समधारयत्
खानः बलेन संयुक्तः निजावासं जगाम ह
८. कौशलः खिन्न सर्वांगः पुनर्नद्यां जगाम च
पुनः स्नात्वा प्रभुं ध्यात्वा क्रुद्धः जाज्वल्य मानसः
९. कुजवकस्य प्रतीकारं चिन्तयामास भूरिशः
कथमेनं च दुःसाध्यं दुष्टं दण्डमापि च
१०. उपानह प्रतीकारः कथमत्र भविष्यति ?
कौशलः चिन्तया युक्तः गृहं प्रति समागतः
११. यवनस्याव मानेन दग्ध देह इवाभवत्
कुजवकस्य विनाशाय हृदये कृत निश्चयः
१२. दिल्लीं जगाय सद्वन्द्व एकाकी खिन्न मानसः
तोमराणां प्रशास्तॄणां राजद्वारे समागतः

१३. तोमरै: कृत सन्मान: कौशल प्रत्यभाषत
कुजवेकन कृतं सर्वं राज्ञे दिल्ल्यां न्यवेदयत्
१४. कौशलस्य वचः श्रुत्वा तोमरः प्रत्यभाषत
द्विज वर्य कुल श्रेष्ठः श्रुतं यद् भवतः वचः
१५. दिल्ली राज्यं भृशं क्रुद्धं दुष्टस्य दमनाय वै
दीनाना मार्त्त हीनानां रक्षणे मम कर्म हि
१६. चिन्तां दुरत्यमां त्यक्त्वा धैर्य्यं धारयतां ध्रुवम्
मम पुनः ससैन्योऽसो भवतां रक्षणे रतः
१७. हनिष्यति महादुष्टं खानं तत्र पर्वते
ससाऽऽश्वस्तः द्विजस्तुष्ट समाऽऽगारे च रात्रितः
१८. बहुशः तोमराणां च धन्यवादं समाहरत्
अन्येद्युः तोमराणां च सभागारे स कौशलः
१९. विस्तरेणात्मनो गाथां श्रावयामास सत्त्वरम्
राज्ञाऽऽज्ञप्तः राज पुत्रः तत्कालं सैन्य संवृतः
२०. कौशलेन समादिष्टः रण भेरी मवादयत्
अश्वरूढ़ाः गजारूढ़ाः स्यद्गनेषु च सज्जिताः
२१. केचन पदातिन शूराः विनिजग्मुश्च सत्त्वरम्
धावत्तः सैन्य गुल्माश्च धूलि धूसरः वाहनाः
२२. लक्ष्यमेकं ध्रुवीकृत्य चेलुश्च नगरात्ततः
पांचाले शिविरायन्तः राजस्यानस्य मध्यतः
२३. वटाला नगरीं प्राप्य तत्रावासं च चक्रिरे
कौशलश्च द्विजः शीघ्रं खानायादेश मुद्वहम्
२४. प्रतिष्ठान पुरीं पूर्वं जगाय विगत ज्वरः
राज्ञे कुजवकायासौ सन्देश मिममुद्वहम्
२५. राजन्! राज्ञा च सुन्दर्य्यः सौम्याः क्षत्रिय कन्यकाः
यात्रायै प्रस्थिताः नूनं त्रैगर्त्त भूमि मण्डले

२६. राजान्! सौन्दर्य्य सम्पन्ना: रूपिण्य: तपचिन्तनम्
कुर्वन्ति—ता: लभन्तेऽद्य विना यत्नेन भूमिप
२७. अद्यैव दुर्ग निष्कास: कर्त्तव्यो निज सैनिकै:
तत्रैव राज कन्यास्ता विश्रमिष्यन्ति सादरम्
२८. कौशलस्य गिरा मुग्ध: लावण्य रस लोलुप:—
कौशलस्य गिर: श्रुत्वा स: विश्वास परोऽभवत्
२९. दुर्गं निर्विन्धं कृत्वा सुन्दरी हृत चेतन:
लालायित मुख: खान: दुर्ग मध्ये ह्यवस्थित:
३०. कौशलेन पुनर्गत्वा तोमराणां च सन्निधौ
सर्वा योजनाऽऽख्याता खानस्य नाश कारिणी
३१. गताधिकाश्च पालंक्य: तासु सुस्थिर मानसा:
योद्धार: कृत: सन्धाना: शस्त्रास्त्रै: सज्ज: मस्तका:
३२. शनै: शनै प्रतिष्ठानं चेलु: चंचल मानसा:
खान: कुजवकश्चासो ललना लास्य लोलुप:
३३. एकाकी दुर्ग तस्मिन् प्रतीक्षायां रतोऽभवत्
कदा द्रक्ष्यामि सुन्दर्य्य: कदा स्प्रक्ष्यामि तन्मुखम्
३४. कदाऽऽलमे कोमलाङ्गी: कदा स्याच्चुम्बनं मधु ?
सुन्दरीणां रूप सिन्धा वुन्मज्जयोन्मज्ज्य खानक:
३५. रूप सागर संभग्न: मुग्ध: मुग्ध: सुमोह च
एतस्मिन्नेव कालेऽत्र पालंकीना महासृति:—
३६. संबद्धा दुर्गे तस्मिन् प्रवेश मारभत मुदा
पालंकीभ्य. यदा सज्जा: तोमराणां च सैनिका:
३७. विनिर्जग्मुर्यदा तत्र दुर्गे साश्चर्य्य माहता:
सैनिकान् सुन्दरी रूपान् यदा पश्यति खानक:
३८. भयाक्रान्तस्तदा दुर्गे कौशलस्य वचोऽस्मरत्
सैनिकै वर्द्ध सर्वांग: खान: मृत्युमवापह

३९. तोमरै दुर्गे तत्र जयस्य घोषणा कृता
तोमराणां ध्वजास्तत्र दुर्गे शोभा मवाप्नुयु:
४०. द्वन्द्व भीनां च निर्घोष स्तदा संजायते भुवि
कुजवकस्य प्रपातेन तोमरा: हर्ष संयुता:
४१. राजपुत्रं प्रतिष्ठाने राज्ये राज्यं समर्पयन्
राजपुत्र: तोमरोऽसौ राजद्वारं समागत:
४२. कौशलं धन्यवादाहैं वंचोभिरभ्यनदन्यत्
पुनराह--महाराज! द्विज श्रेष्ठ! द्विजोत्तम!
४३. किं ददामि किं करोमि भवेत तत् प्रतिग्रहे
एक विन्दु निपातोऽपि नाभूदत्र रणांगने
४४. स्वेदस्य--किं पुनस्तत्र रुधिरेण प्रयोजनम्?
भवदाकांक्षितं सर्व मत्रै वोपहरामि वै
४५. आज्ञापयतु मे देव: यन् यन् मनसि वाञ्छिम्
राज पुत्राग्रहं श्रुत्वा कौशल: विदुषां वर:--
४६. विहस्य च पुनर्वाक्य मिदमाह महीपते!
मयेप्सितं च संलब्धं नान्या वाञ्छा नृपातज!
४७. कुजवकस्य प्रपातेन सर्वं मे हृदि तिष्ठति
कुजवकेनात्र स्पातेन मम याऽप्यवमानना
४८. तस्या: फलं पुनर्लब्धं नान्येच्छा तोमरात्यजा
राजपुत्र: पुनर्भूय: निजाग्रह मुवाच ह
४९. कौशल: राजपुत्रस्य जिज्ञासां च न्यषेधयत्
राजपुत्रेण वंशस्य पौरोहित्य विधायक:
५०. पुरोहितो गुरुस्तत्र समाहूतश्च प्रांगणे
प्रार्थयामास गुरवे निजां कन्या मुवाहर
५१. कौशलाय कुमाराय प्रतिष्ठान प्रदाय च
पुरोहिस्तदैवाग्रे राजाज्ञां स्वीचकार ह

५२. निजां दुहितरं तस्मै कौशलाय प्रदत्तवाम्
पौरोहित्यस्य वृत्तिं सः कन्याहस्ते प्रदाय च
५३. गुरुः कुल गुरुः राजा परं हर्ष मवाप्नुताम्
ततः तस्मिन् प्रतिष्ठाने तोमराणां प्रशासनम्
५४. ग्यचलत् पाल संज्ञानां दिल्ली राज्य निवासिनाम्
पठाणियाः पुनर्जाताः परतिष्ठान प्रपातनात्
५५. त्रैगर्त्ते च द्विगर्त्ते च शताद्वीभ्यः सुंमगलाः
व्यचलद्राज्य सस्थानं कति चिद् वर्ष पूर्वकम्
५६. तोमराणां प्रसिद्धाः ये राजानः शासने रताः–
पश्चात् नूरपुरं प्राप्य शासनं च प्रचक्रिरे
५७. 'पठानकोट' नाम्नाऽघ पंजावे मण्डलं महत्
त्यक्तं पुरा नृपै नीरै रत्रावास मवाप्नुयः
५८. वासुदेवः जगत्सिहः वीरसिहः प्रतापवान्
मुगलानां कटकाध्यक्षो जगत् सिंहोव्यजायत
५९. काबुले चापि कन्धारं विजित्य पुनरागतः
सप्तसाहस्रपदवीं च मुगलाना मधारयत्
६०. जहांगीरेण विरुद्ध्य पूर्वं विद्रोह माचरत्
जहांगीरः जगत्, मित्रं शत्रुश्चापि बभूवतुः
६१. उभयोः शत्रुता मैत्री काले काले व्यजायत
जहांगीरो जगत् मित्र मकवरेण विरुद्ध्य च
६२. सम्राजेऽक्वरायापि शिरः पीड़ा मकुर्वताम्
जहांगीरः यदा शास्ता दिल्ल्याः समपद्यत
६३. बहुवर्षाणि जगता घोरं वैदमधारयत्
बहुवर्षाणि तेनैव भीषणे संगरे रतः
६४. पश्चात् सन्धिं विधायैव सेनापत्यं प्रदत्तवान्
राजरूपः जगत् पुत्रः सेनापति रजायत

६५. अद्याऽपि कौशला: विप्रा: ह्यस्मद् वंश्या वरा: द्विजा:
राज्ञां कुल गुरव: ख्याता: शस्त्र शास्त्र प्रशिक्षका:
६६. नमस्ते भ्यश्चविप्रेभ्यो ये गौरव प्ररक्षका:
राज्ञां प्रशासकानां च मन्त्रेण रक्षणे रता:
६७. दादा नूरपुरी चाहं वितरामीह सत् कथा:
सद् गाथा सच्चरित्राणि तोमराणां महद्यश:
६८. बहुभाषानिबद्धानि श्रोतुणां सुखदानि च
पठाणिया—महामात्य: यशवन्तस्य रक्षक:
६९. रामसिंह: वजीरोऽसौ मयैव पूर्व चर्चित:
आंग्लै: कृत संघर्ष: कारागारं जगाय ह
७०. अत्र हैमाचलं राज्यं राम सिंह स्मृतावपि—
कांस्य मूर्तिं प्रतिष्ठाप्य वीरं सत्करिष्यति
७१. वीर भद्रोऽपि राजा स: कृतज्ञोरां भविष्यति
एकोत्तर सप्तति मिते जन्माब्दे कविता कर:—
एकोत्तर सप्तति मितान् श्लोकान् व्याजहार ह
होरा त्रये विलिखित: सर्वोऽपि श्लोक संचय:—
अन्यैश्च मुद्रितै श्श्लोकै: प्रकाश मधि यास्यति ॥

× × × × × ×

# पंचायती राज्य व्यवस्था

भारतीया व्यवस्थाऽऽसीत् पुरा काले गणात्मिका
१. गण राज्यानि राज्येऽस्मिन् ग्रामे ग्रामे पदे पदे
शास्तृणां च प्रशास्तृणा यद्यप्यासीत् प्रशानम्
२. तथाऽपि गण राज्यानि शासनं त्र प्रचक्रिरे
सर्व वर्ण समावेश: पंचेषु समजायत
३. मुद्राया: नास्ति विस्तार: रूप्यकाणां च संग्रह:
मुद्रया नाप्नुयाद् वस्तु–वस्तूनां च प्रसारणम्
४. ग्रामे ग्रामे भवेत्तत्र सर्व कार्मुक मण्डले
तक्षक:–नापित: लोह घटक:–वस्त्र सीवक:–
५. चर्म कर्म प्रवृत्तौ च लग्ना: सर्वे सहोदरा:
अन्योऽन्योऽन्यस्य साहाय्यं वस्तूनां विनिग्रायनम्–
६. करोति नाऽत्र मुद्राणां लिप्सा वाञ्छा गृहे गृहे
पुरा कालादियं रीति श्चलिता भारते भुवि–
७. सर्व वर्ग समाधानं जायतेऽत्र पदे पदे
सर्वे भ्रातृत्वमापन्ना: द्विजन्मानोऽपि शूद्रजा:
८. नकोऽपि कस्यचिद्दास: समं व्यवहरन्ति हि–
९. पांच जन्या महासूति: सर्व वर्ण सुखावहा
पांच जन्मे जनपदे पुरा कालादजायत
गान्धिना कर्मचन्देन पूर्व मुक्ता सुसंस्कृति:
१०. प्रचारिताऽधुना काले सानैव सफलाऽभवत्
मुद्राणां च प्रसारेण नोरानां च विभीषिका–
११ प्रसृताऽऽसीज् जनपदे ग्रामे ग्रामे सुविश्रुता
कार्मुक: रूप्यकाकांक्षी सर्वत्र समपद्यत–

१२. रूप्यकेणैव सर्वो हि व्यवहारः प्रसारितः
सर्वकारेण रूप्याणां मुद्रणं वहुशः कृतम्

१३. वस्तूना मल्प मूल्यत्त्वं महार्कत्त्व मधारयत्
अद्ययः रूप्यको क्रीतः पणकानां शतेन च

१४. सोहि पण सहस्रेण मूल्यवद्दौ गतस्तदा—
एवं हि मूल्य संवृद्धि जायते हि दिने दिने

१५. ग्राम्याणां मानवानां निर्वाहः कथं भवेत् ?
रूप्यकाणां च सम्प्राह्यै ग्रामाद् ग्रामाद् विनिर्गताः

१६. गृह कार्यं परित्यज्य नगरेषु समाश्रिताः
तत्रैव श्रमिकाः भूत्वा पणकार्वाप्तिवाद्धया

१७. धूलि धूसरः देहाश्च निज कर्म विहीनकाः
ग्रामे कार्मुक वृत्तिं च निघ्नन्तो रूप्य लोलुपाः

१८. युवानः गृह कर्मणि त्यक्त्वा कष्टमवाप्नुयुः
ग्राम्या कृषिर्विनष्ठाऽभूत् कार्मुकानां च कर्मिता—
शैथिल्य माप्य ग्रामेषु—गृहोद्योगाः विनाशिताः।

१९. द्विदलं चूर्णक—धान्यं—धृतं—तैलं च सावुनम्
सर्वं मुद्रया लब्धं कथं ग्राम्यः सुखी भवेत् ?

२०. चत्वारिंशत् वर्षेभ्यः सर्वकारः प्रवोधितः—
नाचरत् ग्राम्य विस्तारं मतः भेदः समुत्थितः

२१. अद्य दिल्ल्यां सर्वकारः पंचायत महानताम्
स्वीचकार-कृतोद्योगः तेषा मुद्धरणे रतः

२२. ग्रामे ग्रामे विकासः स्यात् ह्येकविंशति ह्यर्वुदैः
पुनः विकास कार्याणि प्रारप्स्यन्ते पदे पदे

२३. पंचायत प्रणाली या सर्व कारेण सूचिता—
ग्राम्याः नागरिकाश्चान्येतृष्टि माप्स्यन्ति शाश्वतीम्

२४. श्रमहीनः गृहे न स्यात् विद्या हीनोऽपि मानवः
द्रक्ष्यते–श्रोष्यते नात्र सर्वेऽपि ग्राम मण्डले।

२५. ग्राम्याः ऋण प्रदातारः मध्यस्था ग्राम मण्डले
ग्रामीणानेव लुण्ठन्तो धन धान्य समन्विताः

२६. संजाताः कार कोठीनां समवायै समावृताः
बैंकेषु धन निक्षेपं कुर्वन्ति ते दिवानिशम्

२७. महान्तो भूमिपतयः ऋणं दत्वा द्विरूप्यकम्
व्याज वृद्धौ शत कृत्वा ग्राम्य वृत्ति मपाहरन्

२८. कृषिर्नष्टा मृतो जन्तु र्हल संकर्षणे रतः–
पुनर्भूत्वा ऋणी ग्राम्यः कीदशो वै गमिष्यति ?

२९. अहं तु सर्वकारस्य योजनां ग्राम वर्द्धिनीम्
प्रशंसामि पुनर्भूमः ग्राम्य क्षेत्र विकासिनीम्

३०. दादा नूरपुरी ग्राम्यः ग्रामे कृत निकेतनः
अवस्थां दुखस्थां च दृष्ट्वा व्याकुलितो भवेत्

३१. एभिः पद्यै श्श्लोक युक्तैः पंचायत प्रणालिकाम्
समर्थयति भूमिष्ठां ग्राम कल्याण कारिणीम्।
सर्वमाचरिता प्रान्ते योजना "बीस सूत्रिका"।

× × × × ×

## दिव्यं सरः ?

चम्बा पुर्या अयमाकाशः–
१. ब्रह्मपुरादग्रे कैलाशः
तस्मादग्रे सरः सरांसि–
२. सत्त्व युतानि मनः मनांसि
हैमे शैले विहरति योगी–
३. संसारी न लभते भोगी
कल-रव-युक्ता स्यात् हंसाली–
४. भूर्ज–पत्र–सेविता वनाली
देव दारु- वृक्षाणां शोभा
५. श्वेताना मृक्षाणा माभा
शुभ्र–धवल–परिवेष–विहाराः
६. जीवा स्सन्ति कन्दाहारा
सिंहानां हरिणानां वार्ता–
७. श्रोतुं शक्यो कोऽपि नार्त्तः
ओषायिताः सुगन्धाः वाताः–
८. दूषण रहिताः हिम परितापाः
गिरिजा शंभो रयमावासः–
९. नात्र भीतिर्नात्र त्रासः
ग्रीष्मे प्रावृशि मन्दाः वर्षाः
१०. वनचारिणो विहरन्ति सहर्षाः
हिम खण्डाना मचला वृष्टिः
११. दैवी श्लाघ्या पूर्णा सृष्टिः।
क्वचित् क्वचिद् दृश्यते मनस्वी
१२. गह्वर लीनो भवेत् तपस्वी।
अज वृन्दानां मधुरा वाणी–
१३. पांच भौतिको नात्र प्राणी।
दादा कविरपि तत्र विहारी–
१४. लभते नात्र जन्तुः संसारी।

× × × × ×

# लिखामि किं ?

लिखामि किं ? वदामि किं ?
१. हसामिकि–किं चलामि किं ?
यशो विवर्धयामि किं ?
२. प्रभोर्पदं नमामि किं ?
प्रत्यहं— जयामि किं ?
३. यदा कदा भ्रमामि किं ?
हरिं हरिं भजामि किं ?
४. हिमाचले वसामि कि ?
भवाम्बुधिं तरामि किं ?
५. हिमालये पिवामि किं ?
स्व जीवनं नमामि किं ?
६. दयां क्षमां ददामि किं ?
गुणान् न आददामि किं ?
७. रिपुं न सन्द धामि किं ?
सतं विचारयामि किं ?
चरित्रकं चरामि किं ?
८. सतं सदाऽऽचरामि किं ?
अर्थं समर्पयामि किं ?
९. अरिं विदारयामि किं ?
धनं न चोरयामि किं ?
१०. धृतिं न धारयति किं ?
भ्रमं न भावयामि किं ?
११. शमं न शामयामि किं ?
रिपुं न दण्डयामि किं ?
१२. अर्धं क्षमापयामि किं ?
पदं समापयामि किं ?

× × × ×

# भारतीयो वाङ्मयः

भारतीया महावणी संस्कृता संस्कृते रता-
१. युगै युगैः समाख्याता वेद शास्त्रानुसारिणी
वेद त्रयी समाख्ता दर्शनात् ऋषि दर्शनात्
२. स्फुटिताऽपौरुषेया साऽलिखिता श्रुति गोचरा
युगानामन्तरालेन-लिपि वद्धा च साऽभवत्
३. संसारे प्रसृता पूर्व-पूर्व पश्चिम गोचरा
कोटिशः श्लोक निर्माणं व्यदधात् सा सुरेरिता
४. श्रुतीनां व्याख्याने सा ब्राह्मणैः पुनरीक्षिता
उपनिषदां च व्याख्याने पुनः सरलतां गता
५. अष्टादश पुराणानि षड्दर्शन युतानि च-
स्मृतयो भिन्न सर्वांगाः विधि शास्त्र प्रयोदिताः
६. पुराणान्युप पुराणानि पश्चाच्च निर्मितानि च
चतुर्लक्षमिताः श्लोकाः पुराणेषु निरूपिताः
७. भारते लक्ष संख्याकाः लक्षशोऽन्यत्र वाचिताः
चतुर्विंशति साहस्र वाल्मीकि मुनि रंजितम्-
८. रामायणं महाकाव्यं-मादि काव्य मुदीरितम्
सुभाषितं समाख्यातं भाण्डागारं च विस्तृतम्-
९. दश साहस्र रत्नैश्च भाण्डागारे समाहितम्।
तान्त्रिकाः मान्त्रिकाः ग्रन्थाश्चान्ये श्रुति सम्मताः
१०. वैष्णवाः शैव शाक्ताश्च-वहुधर्म परायणाः
मोक्षर मुल्लर शर्मण्यो-वेद विद्या विचारकः
११. परमं तोष मालेभे वेद धर्मानुयायी सः
अद्याऽपि पश्चिमे देशे वेद धर्मा नुरागिणः-
१२. वेदं पुरातनं ग्रन्थं मन्यन्ते सामिषाशिनः।
यावने शासने काले दुर्दान्तै र्ये विनाशिताः-

१३. ग्रन्था गारा: कथं तेषां गणना जायतेऽधुना
आर्याणां च विनाशाय या: या: चेष्टा: कृता: पुरा
१४. ता: संस्मृत्य संस्मृत्य मनो वैकल्य मान्पुयात्
ऋषिभि मुंनिभि श्चापि काले कालेऽर्पिता पुन:
१५. षड्दर्शन व्यवस्थाऽपि काले काले व्याजयत
ज्ञाणवी-ऐश्वरी-चापि न्याय-सांख्य विधायिनी
१६. वर्ण्देव व्यवस्थाऽपि भारते पुनरुद्यवा-
वैदिका: कल्पिताश्चापि देवास्तत्र प्रपूजिता:
१७. अवतार कथाश्चापि प्रसंगा पूरिता: गता:
युगान्तर प्रसंगेन भारतेऽत्र प्रसारिता:
१८. आयुर्वेद: धनुर्वेद: ज्योतिश्चक्रं महर्षिभि:
गदितं गणना युक्तं त्रिस्कन्धै: परिपूरितम्
१९. होरा मुहूर्त्त सिद्धान्ता. कविता: फल मिश्रिता:
राशीना मृक्ष जातानां पुनराकलनं कृतम्
२०. नवांकानां विद्या शून्य विधिना विविधागमै:
विश्वे प्रसारिताऽस्याभि गणना पारदर्शिभि:
२१. मन्दिराणि मठास्सर्वे स्थापिता: पूर्व पश्चिमे-
चीने रूसेऽमरीकायां मद्य संलभते च तत्
२२. पुरा तात्त्विक मर्मज्ञै: शोधितं वर्णितं हि यत्
आर्यागमनं भूय: निन्दितं तत्त्व दर्शिभि:-
२३. अनार्य जुष्ट मे तद्धि गौरांगैश्चैव भ्रामितम्
नाट्य शास्त्र विद्या पूर्वं भारती यैरुदाहृता-
२४. काव्य-शास्त्र कला चाऽपि युग धर्मानुसारिणी
रामायणं कि मधास्ति भारतं चापि विस्तृतम्-
२५. विश्वे समाहृतं यच्च-वेद शास्त्रानु भूतिदम्
'शाकुन्तलं' कुतश्चास्ति-कालीदासेन भाणितम्
२६. छन्दो वृत्त विद्या कुत्र जायते विश्व संस्कृतौ ?
यल्लिखेत् तत् पठेत् सर्व-विश्वे कुत्र संस्थितम्

२७. संसारे वहु संख्यानां लिपीनामद्य या सृतिः-
नागरी लिपि साफल्यं भजते साकिमीदृशी ?
२८. उत्तराद् ध्रुव खण्डाद्धि दक्षिणे ध्रुव मण्डले-
भारतीया पताकाऽद्य स्फारिता प्रस्फुरितायते-
२९. कथमद्य वयं जाताः दीनाः हीनाः निराश्रिताः ?
अद्य माद्यम तत्त्वानां षड्यन्त्रं तत्र कारणम्।
३०. शास्त्रीय संगीतानां वाघानांया कथा पुरा-
श्रूयते साऽद्य विश्वेऽस्मिन् संस्कृतां संस्कृतायते
३१. हरि दासस्य शिष्येन तानसेतेन या कथा-
संगीतानां चमत्कारे विश्वे विश्राविता पुनः
३२. अवैदिकाः मताश्चापि भारते ख्याति मान्पुवन्-
वौद्धाः जैनाश्च चार्वाकाः संदिशन्ति निजं मतम्
३३. शंकराचार्य पादैश्च वैदिकीं संप्रयोदिताः
दिशा-वौद्धान् विनिर्जित्य-भारतात्ते विनिर्गताः
३४. पुनश्च गौतमं बुद्धं वयमवतार पद्धतौ-
गणयामो हि सौहार्दात् हिंसाचार निवारकम्
३५. वैदिकश्चार्थ वादोऽपि द्वैविध्य ममजत् पुरा
देवतार्थ परश्चान्यः निराकार परोऽभवत्
३६. यास्काचार्य भाष्येषु देवता परकोऽभवत्-
सायणेनापि भट्टेन निरुक्त मुक्त मुदा-
३७. दयानन्देन भाष्येषु निराकार पदः कृतः
सोहि दामोदरेणात्र भणितः देवता परः
३८. आर्याणांमत वैविध्य मघाऽपि दृश्यते भुवि-
देवता वाद परकः सिद्धान्तः भुवि खेचते-
३९. विद्वद्भिराहतः सद्भि वेंदाचारः विचारकैः
इन्द्रो-वरुणश्चाग्निः प्रजापति रुदीरितः-
४०. भिन्नाकृतयस्यस्सर्वे भिन्नार्थाः भिन्न कर्मजाः
अष्टधा प्रकृतौ चैषां भिन्ना दीप्तिर्विराजते-

४१. भिन्ना: क्रिया: प्रकाशन्ते प्रत्यक्षं दृश्य गोचारा:
विज्ञानेनाऽद्य तत्त्वानां संख्याने वहु घोषितम्-
४२. ऊर्जा च संप्रकाश्च वैद्युती च विभीपिका
अणु संघट्टनं सांख्ये–विघट्टन मुदीरितम्-
४३. वैदिकश्चार्थ वादश्च कथं हि शिथिलायते ?
मधुसूदन ओझानां द्विशते संस्कृतालये-
४४. ग्रन्थागारे जयपुरे वैदिका सृतिरुज्वला-
इंगलैन्डे चापि ओझाऽसौ विदुषां सम्मुखे स्थित:
४५. प्रोवाच वैदिकीं भाषां ज्ञान विज्ञान सारिणीम्
विज्ञानं नूतनं नास्ति-प्रत्नमत्यन्त गोपितम्
४६. ऋषिभिर्वर्णितं पुर्वं-साश्चर्य्यं मशृणोत् सभा-
गौरांगानां सभागार: विदुषां लन्दने स्थित:-
४७. ओझाया: भाषणं मुग्धो मूको भूत्वाऽशृणोत् तदा-
वेदिकस्य च ज्ञानस्य ध्वजारोहं चकार स:
४८. वेदिके स्वीय विज्ञाने सर्वं पुनरवर्णयत् ।
हिन्दू दर्शन व्याख्याने पश्चाद् गिरिधराह्वय:-
४९. चतुर्वेदी च वच्छिष्य ओझा ज्ञान मुदीरयत्
महा महा ह्युपाध्याय: परमेश्वरं सज्ञक:-
५०. तच्छिष्य: लवपुरे तत्रा ध्यापन मुपारभत
दादा नूरपुरी चाहं तत्रैवाध्यमने रत:-
५१. षड् भाषानां कवित्वं च विदधाति दिने दिने
गताब्द्रे चैक वर्षे हि–चतुर्ग्रन्थ प्रकाशनम्
५२. कर्त्तुमीहे त्रिभाषासु–संस्कृते तत् सुतासु च ।

× × × × × ×

# ज्यौतिषम्

वेदानां ज्यौतिषं चक्षुः सर्वशास्त्र विचारणां-
१. त्रिस्कन्धे भारतीयाना मासीदभाव धारणा
षष्टि सम्वत्सराणां यत् काल चक्र मुदाहृतम्-
२. नान्यत्र लभ्यते विश्वे विज्ञानेन समन्वितें-
त्रिस्कन्धे गणना स्कन्धः सिद्धान्तः परिकीर्त्तितः
३. होरामुहूर्त्त फलितौ द्वौ स्कन्धौ च निरूपितौ
गणना भारतीयानाद्य सैद्धान्तिकी मता-
४. ज्यौतिषे ग्रहणं मारं-वाराणां च क्रमाङ्कनम्
ऋक्षाणां राशी चक्राणां भ्रमणं दृश्यते च रवे-
५. पूर्व माकलितं लक्षैर्वर्षैः पारदर्शिभिः
मुहूर्त्तं शाकुनं शास्त्रं प्रायशो तथ्य दर्शकम्
६. फलितं शङ्कया युक्त मधुना सम्प्रवर्तते।
पश्चाद्वुद्धु मिताः लोकाः संसारे देह धारिणाः
७. द्वादशे राशिचक्रे ते कथं फलमवाप्नुवन् ?
स्थूलत्त्वेन फलांकाक्षी सर्व एव जनोमतः
८. लभते न फलाकांक्षा मीप्सितां भुवि सम्मताम्
पुत्र-दार-गृहादीनि भाव चक्र स्थितानि च-
९. भावै द्वादशभिः सत्यं कथ मालभते नरः।
ग्रहाणां च शरीरेषु प्रभावाः फलं दायकाः
१०. रुधिरास्थि समूहेषु ग्रहाणां तारतम्यता-
ऊर्जां यच्छति देहेऽस्मिन्न् दयन् भास्करो भुवि-

११. प्राणापानौ सृजेदात्मा जीवानां प्राण दायकः
चन्द्रः सोमरसापूर्णः मनः सोमात्मकं सृजन्

१२. प्राणिनामथ माधारः मनश्चेतनां व्रजेत्
भौमः रक्त कलापूर्णः चालयन् रक्त वाहिनीः

१३. रक्त कोश समाच्छन्नः रुधिरस्य च देवता—
बुधो बुद्धि प्रदाताऽसौ जीवो ज्ञान विवर्द्धनः—

१४. शुक्रः शुक्राणु संघाते कुरुते सन्तति प्रजाम्
शन्याक्षिप्त चित्तानां क्रूरा संस्कृति रेश्यते

१५. शनेर्कक्षा घोरतमे निविड़े तमसि स्थिता
शनेरूर्ध्वं न प्रकाशः कक्षा सातिमिरावृता—

१६. स्नापयति तिमिरेण सौर तेजोविवर्जिता—
वराह मिहिरे काले राहु केत्वादि कल्पना

१७. नाणीतत्र ग्रन्थेषु पश्चाज्जातेष मर्चना।
देह धारि समूहेषु ग्रहाणां यत् तरंगणम्—

१८. वैज्ञानिके युगे नाद्य प्रति भाति जने जने।
वार्ता पत्रेषु सर्वेषु या राशि फल घोषणाः

१९. त्रियन्ते प्रत्यहं सर्वास्ताः तथ्येना प्रचोदिताः
दादा कविरहे मन्ये द्वौ स्कन्धौ ज्योतिषस्य च

२०. फलदायी ज्योतिषकला शंका युताऽधुनामता

× × × ×

# चिकित्सा ?

भारतीय चिकित्सासु त्रैगुण्यस्य प्रधानता–
१. वातः–पित्तं–कफश्चैव त्रिगुणा धारितो मनुः।
सत्त्वं–रजस्तम इति सूक्ष्मत्त्वात् तत्त्व दर्शनम्–
२. ओषधीभ्यश्चिकित्स्यास्स्युः केचनरोगाः भयानकाः
रसैः सम्पद्यमानाश्च योगस्य क्रियया‌ऽपिवा–
३. अद्य चुम्बक संयन्त्रै दुश्चिकित्स्यं चिकित्स्यो
होम्योपैथी क्रिया‌ऽपि स्यात् विश्व ख्याता-मनोहराः
४. रत्नानामपि सारेण होम्योपैथ्यां प्रचारिता।
द्वादशभिर्लभते लवणै रेको भागोऽपि विश्रुतः
५. सोऽपि नीरोगतां धत्ते मानवे देह पंजरे
ऐलोपैथी विद्या चान्या विश्वे सर्वत्र छादिता-
६. जीवनीयैरुपायैश्च साऽपि स्यात् फलदायिनी
सिद्धानां प्रक्रिया चान्या रससिद्धै र्महर्षिभिः
७. रसानां संप्रयोगेन सिद्धयन्ते रस संपदः।
यूनानीनां च पद्धत्यः यावने भारतेऽपि च-
८. प्रसारमल भन्तैताः रोग शोक निवारकाः।
यूनानी पद्धति ख्याता चतुर्वर्ग विधायिनी-
९. आसवारिष्ट धातूनां सामञ्जस्येन स्थिराभवेत्
भारतेऽमृत मूलाना मोषधीनां प्रसारणम्-
१०. वानस्पत्यं जगच्चान्ये नानुजानन्ति देशजाः
शतायुर्बल दायिन्यो भारते स्युर्वनोद्भवाः
११. शतावरी - शंखपुष्पी - ब्राह्मी - शुण्ठी - सपत्रका-
आयुष्मती-वसा-प्रोक्ता सर्व रोग निवारिणी

१२. त्रिफलं-विल्व-निम्वे च गोक्षुरश्च पुनर्नवा-
अर्जुनः भृंग राजश्च-निर्गुण्डी-मधु यष्टिका-
१३. अन्याः ग्राम्याः वहुज्ञाताः ग्राम्य लोकेषु विश्रुताः
महौषध्यः प्रजायन्ते रुधिरास्थि प्रसाधकाः
१४. धातूप धातु संसिद्धा-मनोरोग विनाशकाः
भारतीयै स्सुवैधैश्च कथिताः गद हारिकाः
१५. चरकः सुश्रुतः-वाग्मी-वाग्भट्टः भिषजां वरः
चक्रिरे विदिधान् ग्रन्थानायुर्वेद विद्या युतान्
१६. पतंजलिर्महा योगी भाव मिश्रोऽथ चक्रकः
निर्माय विविधान् ग्रन्थान् संसार मुप चक्रिरे
१७. अन्येऽपि वहवो वैद्याः ज्ञाता ज्ञानाः तपस्विनः-
भारते भिषगाचार्याः समादर मवाप्नुवन् ।
१८. दादा नूरपुरी चापि त्रिविधाः रोग पद्धतीः
पठित्वाऽभून् स्वयं वैद्यः रोगैराक्रान्त मानसः
१९. भिषजां सन्निदानेन ये रोगाः दुर्निवारकाः-
ते सर्वे नाश मायान्ति हृदिस्थे जगदीश्वरे-
२०. तुलसी दल मिश्रेण पंचामृत सुसेवनात्-
वैद्यो नारायणः कुर्यात् सर्व रोग निवारणम्
२१. दुश्चिकित्स्यं चिकित्स्यं स्यात् नारायण हरिसेवनात्

× × × × × ×

# अष्टांगो योगः

यमश्च नियमश्चैव ह्यासनानां विशेषता-
१. प्राणायामः प्रत्याहार. ध्यान योगस्य वर्णनम्
धारणा सप्तमो योगः समाधिः पुनरष्टयः
२. यमेन संयमानाप्य नियमेन चरित्रकम्
आसनानि विशेत् प्राज्ञः योगाधार युतानिच
३. पद्मासनं विशेत् पूर्वं सर्वानां च शोधकम्
शरीरे सौष्टवं दघात् मदिवे चैव चेतनाम्
४. सर्वं वै स्नायु जालं पद्मवद्धं स्थिरं भवेत्
मनः स्थैर्य्यं पुनः प्राप्य योगे स्याद् धारणा दृढ़ा
५. सिद्धासनेन सिद्धयन्ति प्राणायाम क्रियाः शुभाः
प्राणापानौ वंश नीत्वा योगी स्यात् शान्तमानसः
६. आससनि वहूम्यासन् काय क्लेश हराणि च-
मुखासन शवादीनि सर्वागां ह्लादकानि च
७. जल नेतिः सूत्र नेतिः धृतनेनिः पयो युता-
सर्वाः नेतयः कुर्युः मस्तके परिशोधनम्
८. नासारन्ध्रात् जलं ग्राह्यं कोष्णं लवण मिश्रितम्
उभयोर्नासियोः छिद्रात् वारं वारं क्षिपेद् भुवि-
९. रन्ध्र युक्तेन पात्रेण प्रातः कुर्यात् निषेचनम्
उभयोः रन्ध्रयो र्मध्यात् पश्चात् कापालिका क्रिया-
१०. विदधात्मेव यो योगी स रोगै र्मुच्यते ध्रुवम्-
जायते स्वल्प कालेन तोय क्रीड़ा विशोधनम्

११. जलमापीय कोष्णं च रेचनं विदधायि च
आसनैश्च समाश्लिष्टं शरीरे शोध कारकम्-

१२. एवं वहुविद्यायामै र्योगानं क्षेम कारकैः
भारतं विश्व गुरुतां धारमन्नत्र विश्रुतः

१३. विश्व ख्याताश्च वहवो योगिनो भारतोद्भवाः
भारते गौरवं प्राप्य विश्वेऽपि मान्यतां गता-

१४. अरविन्दश्च माता च ज्ञाताऽज्ञाताः धुरन्धराः
योगिनश्चोप कुर्वन्ति पुरा कालात् मुनीश्वराः

१५. अद्यापि धूर्त पन्थैश्च योग मार्गो विगर्हितः
वंचिताः वंचकै र्लोकाः धन लोभादसाधुभिः

१६. तेषां का गणना चाद्य भोगासन प्रचारकाः
लभन्ते कीदृशीं चेष्टां विश्वे सर्व प्रसारितम्

१७. गीता वक्ता पूर्वमेव निन्दिताः तामसाः जनाः
कामात्मानः लुण्ठन रताः धन दार परायणाः
दादा नूरपुरी चाहं करोमि योग चर्यनम्-
योग विद्या महा गुह्या सर्वारिष्ट निवारिणी

× × × × × ×

# भारतीया न्याय व्यवस्था

भारते गण राज्येऽस्मिन् न्यायस्य विविधाः विधाः
१. प्रचालिताः पुरा काले सर्वत्र न्याय वादिभिः
याज्ञवल्यो मनुर्व्यासः तत् पिता च पराशरः
२. अन्ये स्मृति काराश्च सर्वे हि न्याय वादिनः-
वसिष्ठोऽत्रिर्भरद्वाजः गौतमो विश्व मित्रकः-
३. धर्म न्याय प्रवक्तारः न्याय रक्षण तत्पराः
प्रजारंजन कामार्थं सीताऽपि विजने गता-
४. शिवि श्येन कथाचापि प्रसिद्धाः भारते भुवि
हरिश्चन्द्रो महाराजः श्मशाने शव दाहनम्
५. अकरोत् न्याय संबद्धः सौर वंश्यो महामतिः।
अद्य न्याय तुला देशे विलपेदनुभूतिदा-
६. आंग्ले शासने न्याय निष्ठा पृथगुदीरिता-
प्रचालिता च गौरांगैः भारतीयागम प्रदा-
७. उच्चाः न्यायालयाः केचन भारते स्थिति मावहन्
राष्ट्राध्यक्षोऽपि न्यायस्य प्रतिष्ठां स्वीकरोति हि-
८. सर्वोत्तम पीठोऽत्र दिल्ल्यां सुप्रतिष्ठितः
तदधीनाः स्वल्पपीठाः प्रान्ते प्रान्ते प्रतिष्ठिताः
९. मण्डले मण्डले चापि ग्रामे ग्रामे जनाश्रये-
कनिष्ठाः न्यायपतयः न्याये निष्ठामत्रो धमन्
१०. न्याय निष्ठा भारतीया विश्व ख्याता निरापदा
स्वातन्त्र्ये राज्य संकाये प्रभूतां ख्याति मामता

११. जगमोहन सदृशाः न्यायपालाः बभूविरे
ते गान्धेरपि चयन मस्वीकुर्वन् नयालये-
१२. पी० एन० भगवती वाग्मी कृष्णश्चाय्यर नामक-
प्रतिष्ठा मर्जयेतां द्वौ न्याय शासन पारगौ
१३. अद्य न्याये प्रणाली सा भ्रष्टाचारेण पीड़िता-
क्वचित् क्वचिच्च लभते शंका माश्चर्य्य कारिणीम्
१४. हिमाचलेऽपि प्रान्तेऽस्मिन् भ्रष्टाचारेण पीड़िताः
न्यायधिपतयो भेजुः प्रशासन प्रताड़नम्-
१५. विश्वस्योच्चतमे पीठे प्रमुखत्त्वमवाप्तवान्-
भारतीया न्याय नीतिः विश्वे न्यायं प्रदायिनी
१६. शिमलायां पाठकः पूर्वं न्यायाधि पति रागतः
दिल्ययां सर्वोच्च पीठेऽपि प्रमुखत्त्वमवाप्तवान्
१७. विश्वस्योच्चतमे पीठे पाठकः चाद्य यास्यति
प्रमुखत्त्वं भजेत्तत्र विश्वस्य न्याय पद्धतौ-
१८. दादा नूरपुरी कैश्चिन् न्यायाधीशैश्च पीड़ितः-
वर्णयामास सुख्यातां भारते न्याय शृङ्खलाम्
१९. अद्य स्तुत्या पुन स्तुत्या स्तुत्याः स्तुत्याः पुनः पुनः
न्याये निष्ठा प्रतिष्ठा च भारते चाद्य संस्थिता
२०. स्तुत्यश्चैकः समाचारः योऽस्मायिरपि विश्रुतः
संस्कृते न्याय निर्घोषः कृतश्चैकेन धीमता
२१. शास्त्री पंत जलिश्चैको न्याय वेत्ता बभूव हा

× × × × × ×

# रक्त पातः

पृथ्वी गोलः समुद्रेषु गगने कन्दुकायते–
१. जलस्य स्निग्धतां त्यक्त्वा रक्ते स्नाति मुहुर्मुहुः
पूर्वं रूसे रक्तपातः भीषणः समजायत
२. स्तालिनस्य च स्वराज्ये रक्तस्य सरितोऽवहन्
तस्य शिष्योऽभवच्चीनः माओनां च :पथोन्मुखः
३. भीषणं जनसंहारं व्यदधान्निज मण्डले
जर्मन्यां हिटलरो जातः यहूदी वंश नाशकः
४. लक्षशो जन संहारान् कृत्वा सोऽपि दिवं गतः
मुसोलिनी तस्य भ्राता सोऽपि पंचत्व मागतः–
५. अफगान भूमौ च रक्तस्य सरितोऽवहन्
सिन्धे पाके च बंगाले क्रूराणां ताण्डवीक्रिया
६. लंकायां हिंसकाः जन्धुनिर्दोषान् तामिलान् जवान्
तामिला अपि नरसंहारं चक्रिरे रक्त रंजितम्
७. चीनः बौद्धांश्च निर्दोषान् ल्हासायां गुलिकाहतान्
बौद्ध जाग रतान् सर्वान् मारयामास तिब्बते।
८. मानवानां च हिंसाऽद्य मत्कुणस्य समा भवेत् ॥
पंजाबे दश वर्षेभ्यः प्रत्यहं रक्त पातनम्–
९. जायते शिशु वृद्धानां नारीणा मस्ति क्रन्दनम्।
निःशस्त्राणां महाघोरः हिंसाचारः प्रवर्तते–
१०. शकटीनां प्रपातेन–पोतानां ध्वसनं भवेत्।
नौकानां जल चारीणां बहु शोजन संक्षयः–
११. आकाशे वायुयानानि विहरन्ति दिवानिशम्।
गृध्राणां पक्षघातेन खण्ड–खण्डं बभूविरे।

१२. ईरानेराकयो र्मध्ये रक्तपातः सुदारुणः–
दश वर्षाणि संजातः भीषणः लोम हर्षणः ।
१३. यहूदीराज्य सम्प्राप्तयै संघर्षोऽपि महानभूत्–
अर्बुदैः सह संघर्षे लक्षशो मानवाः मृताः ।
१४. अद्यापि तीव्र संघर्षे जायमाने सुदारुणे–
अमरीका हितं नष्टं कुत्र चिच्चैव वर्द्धितम्
१५. लेब्नाने यावनं स्साकं ख्रिष्टानां संगरे युते–
ख्रिष्टाः यावनिकाः लक्षाः गच्छन्त्यद्य यमातयम्
१६. आरमीनिया गणराज्ये विद्रुह्यन्त्य नागराः
रूसं राज्यं विरुद्धयन्ति स्वातन्त्र्य हित चिन्तया ।
१७. चीने राजधान्यां च लक्षणो युवकाः युताः ।
अधि नायक वादं ते घोरं निन्दन्ति संघशः ।
१८ मार्क्सी चीनोऽपि दुर्दान्तः यूनामद्य सदाग्रहम्–
दृष्ट्वा भीतः भयेनाद्य त्यक्तुं वाञ्छति ताड़नम्
१९. रक्तस्य भीषणाः नद्यः पूर्व पश्चिम दक्षिणे–
प्रतीच्यामपि गच्छन्ति मानव प्राण घातकाः
२०. दादा कविरिहाद्यास्ति शान्ते पर्वत मण्डले–
यत्र नास्ति रक्तपातः हिमपातः प्रवर्तते
२१. सौम्यः शान्तः समृद्धोऽयं गिरिदेशो हिमाचलः
लभते शाश्वतीं शान्तिं चौर त्रास विहीनताम्
२२. गिरि गह्वर संपन्नां धारये दचलां श्रियम् ॥

× × × × × ×

# नारी दुखस्या ?

पुरा युगे तुनारी स्यात् पूज्या परम देवता–
१. अद्य सभ्य युगे दीना हीना संजायते ध्रुवम् ।
वधू नामद्य संदाहः प्रत्यहं संप्रवर्तते ।
२. श्रुत्वा श्रुत्वा मनोयाति धीमतामपि कम्पनम् ॥
अद्यैतत् कम्पनं घोरं भारते श्रूयते सदा–
३. पत्राचारेषु द्रष्टव्यं प्रत्यहं मुद्रितं भवेत् ॥
धूर्ताः विध्वसकाः जाताः मानवाः देह धारिणः
४. दूरदर्शन लोभेन द्विचक्राणां च वाञ्छया
कोमलांगीः धातयन्ति कुत्रास्ति परमेश्वरः ?
५. पुनर्विवाह मारच्य निर्लज्जाः कामुकाः भृशम्
समाजे व्रण कर्त्तारः हृष्यन्ति च रमन्ति च
६. दण्डिताः न्यायपालेन क्रूर कर्म विधायकाः
रूप्यकाणां प्रभावेण मुक्ताः हृष्टाः नराधमाः
७. वी० वी० सी० सम्प्रसारेण प्रतीच्या वहु सूच्यते
सभ्य देशेष्वपि नारीणां मवमानना
८. तत्रास्ति नारी संभोग्या केलि स्थानं निरापदम्
लन्दनेऽवैद्य रूपेण पंचाशीतिः शतेषु च ।
९. दुराचारस्य वृत्तिः स्यात् पैरिसे च शताधिका
अवैद्य जन्म जातानां नास्ति तत्रवामानना
१०. मातृ-पितृ-विहीनानां नास्ति तत्र विचारणा
भारते मातृ रूपेण वन्द्या स्याल्ललना शुभा ।
११. यावने शासने काले नारी भोग्याऽवमानिता–
ईराने यावने देशे नारीणा मुत्पीड़नम् ।
१२. वलध्वंसः बलात्कारः सामान्यं तत्र जीवनम्
धर्मान्धैः पीड्यते नारी शोष्यते चापि निर्दयैः

१३. बहु पत्नी प्रथा चापि नवास्ति धर्म सम्मता
एक एव गणाध्यक्षः बहु पत्नी निषेवकः
१४. न तेषां हृदये पीड़ा नारीणामपि शोषणे
भर्तुः शुश्रूषणं कुर्यात् बालानां च प्रपोषणम्
१५. कृषिं पश्येद् गृहं रक्षेत् पात्राणा मवमर्दनम्
दूरदर्शन चित्रेषु निद्रूपेण प्रदर्शिता
१६. चित्रावल्यां चित्रहारे किमेतत् तत् प्रदर्शनम् ?
क्षत्र व्यापार संमूढैः दृश्यते या विरूपता
१७. किमस्ति नारी सम्मानं ? घोर रूपा विडम्बना
रोदित्यत्र मनो दग्धं दुश्चित्रं श्चित्रहारकैः
१८. सामाजिकीयं सुख्याता—कुख्याता वाडवमानना ?
भारते यत् मुनीराणां रूपं शुभ्रं सुवर्णितम्—
१९. दुश्चित्रै लोपितं सर्वं मातृ रूपं सुसौख्यदम्—
सप्तशत्यां तु नारीणां ये रूपाः वर्णिताः शुभाः—
२०. विद्या-क्षमा धृतिर्मेधा-मातृ रूपाङ्किताः शुभाः
यादेवी सर्व भूतेषु सर्वा रूपेण संस्थिता
२१. नमस्तस्यै--नमस्तस्यै—नमस्तस्यै नमो नमः
अद्य शासनमारूढ़ा थैचरी खेचरी पुनः
२२. लंकायां नायके जाता सुट्टो पाके स्वयं वृता
इन्दिरा प्रिय दर्शिन्याः कोपमा जायते भुवि ?
२३. कोटि कोटि जनास्तस्याः कुर्वन्त्यद्य समर्चनम्
हिमाचल प्रदेशेऽपि नारीणां च निरादरः
२४. द्रष्टव्यो किन्नरे भूमौ शताब्दीभ्यः प्रचारितः
बहु पति प्रथा चात्र सभ्य जाति तिरस्कृता—
२५. प्रचलेत् मण्डले ग्रामे वनेषूपवनेषु च।

× × × × ×

# अद्य किम्

सभ्याचार: सदाचार: मद्यपानेन लुण्ठित:-
१. द्यूतेन लुण्ठिता: पूर्वं पाण्डवा: वनवासिन:।
अद्य द्यूतं महत् पुण्यं-लाटरी, रूप संक्षितम्-
२. गृहे गृहे प्रचलति ग्रामे ग्रामे जने जने।
मन्त्रिण: सांसदा: विश्वे ख्याता: क्रूरा: विचक्षणा:
३. भ्रष्टाचारस्य गर्त्ते पतिता: न पुनरुत्थिता:।
टाचर: पद निर्भ्रष्ट: जापाने मन्त्रि मण्डलम्-
४. पदात् भ्रष्ट: स मार्कोस: मृत्यु शय्या मुपागत:
स्थान भ्रष्टा: न शोभन्ते दन्ता: केशा: नखा: नरा:
५. व्यापार: भ्रष्टतां यात: सर्वकारा: प्रदूषिता:
शासनं भ्रष्टतां यातं न्याय्यं च भ्रष्टायते-
६. विपण्मा मामिषं भ्रष्टं पशु मांसेन मिश्रितम्
सुराऽसुराणामापेयं तस्या मप्यस्ति भ्रष्टता।
७. दुग्धं भ्रष्टं घृतं भ्रष्टं तक्रं शक्रस्य दुर्लभम्
दध्यन्नं विष संयुक्तं सर्वं चोर्वरायते।
८. सौवर्णं भूषणं भ्रष्टं रौप्यं रोदिति भूरिश:
पात्राणि लोह मिश्राणि क्रीडन्त्यद्य गृहे गृहे।
९. धातवोऽधातवो जाता: माणिक्यं मरणायते
खाद्यान्नान्यपि भ्रष्टानि-जीवनं-भुवनं-वनम्-
१०. अमृतं स्वादु संजीवी-विष पूर्ण मिहात्र च।
सगीतं भारतीयं यच्छास्त्रीयं स्वर ताल युत्

११. पाश्चात्यै र्वादिनै र्वद्धं रोदित्यद्य दिने दिने।
हा–हा–हं–हो–दुरालापं–दुःस्वरं कर्ण छेदनम्

१२. गायन्त्यद्य-लता-चोषा-वेगमी सा गमे रता।
तस्कराणां च यः सर्वः विष भैषज्य विक्रयः–

१३. सीमासु परिद्रष्टव्यः जल स्थल युतासु च।
भंगानां भेषडांसारं तत्काले वहु स्फूर्त्तिदम्–

१४. युवासेव्यं–च सुलभं मूर्च्छाऽशान्ति प्रदं महत्।
सन्धिच्छेदः भवेद् भित्तौ वस यानस्य लुण्ठनम्

१५. यूनामद्य क्रिया नित्या भौतिकी-पारमार्थिकीः
कन्योपहासः निर्व्रीड़ा चौर्य्यं चैवास्ति नग्नता

१६. मूढ़ालापः–वृथालापः सभ्ये जगति निष्ठितः
दादा कविरिहा स्त्यद्य लेखने शोचने स्तः–

१७. किं लिखामि ? क गच्छामि ? को वेदा नुद्धरिष्यति ?

× × × × ×

# गुरु वन्दना

नमोऽस्तु गुरुदेवाय पर ब्रह्म स्वरूपिणे—

१. अखण्डानन्द बोधाय नमः शान्ताय तेजसे

नाना विद्या निधानाय नमो ग्रन्थ कराय च

२. विभूतये च महतां शाश्वतायामराय च—

कृष्ण तत्त्व प्रदायास्मै ज्ञान दीपस्य ज्योतिषे

३. नमो नमोऽस्त्वनंताय वृन्दा कानन वासिने

सानन्दाय प्रबुद्धाय मुम्बय्यां च विहारिणे

४. वेदान्तीनां च गुरवे—भक्ति रूपाय ते नमः

दादा नूरपुरी चाहं तेषां सान्निध्यमागतः

५. कृत कृत्यो भवाम्यद्य षड् भाषा रत्नाकर

तेषां स्मरण मात्रेण स्फोटमायान्ति कोटिश

६. काव्यानां दीप्तयः सर्वाः ज्ञान दीपेन दीपिता ॥

× × × ×

# हिमगिरि स्तवः

जय हिमगिरि—जय पर्वतराज विभो!
१. जय कैलाश निवासिन्! शंकर देव प्रभो!
जय हिम मुकुट शुभ्र, वर-वरदान प्रद!
२. जय चामुण्डा—नयना—स्वामी त्वं वरद!
उज्ज्वल-हिम-परिधान, कान्तिमय करुणामय
३. वन-उपवन-उद्यान विहारिन्, शोभा मय!
झर-झर-निर्झरिणी-निर्झर-मुनयः जपनिरताः
४. ऋक्षाः वृक्षाः हरिणाः अमृत पान रताः।
सुधा—स्यन्दिनी—यमुना—पावन—धारा-युत-
५. रावी—चन्द्र—विपाशा—सरितः जल संयुत।
देवा अत्र वसन्ति त्रिगुणमयी माया-
६. कुत्रचित् हिम परिधाना हैमी हिम छाया
सात्त्विक जन परिधाना तमसावृत रात्रिः
७. चान्द्री चन्द्र छटायां लोके सुखदात्री
दादा कविरपि गायन्ति मधुरं संगीतम्
८. हिम दर्शन रसिकैः रम्यमृतं संपीतम्।

× × × × × ×

# हिमगिरि दशकशती समापनम्

१. हिमगिरि दशकशतीं यः—स्मरति पठति—वाचयति च—
हिमगिरि वसुधा विभवं-ज्ञास्यत्यचिरेण मानवस्यथ

२. एकोने नवति नवे शिष्टे वद्धा हिमाचले-शतकी—
दादा नूरपुरी स एकोत्तर सप्तति तमे व्याख्याति

३. वर्षे चलिते दादा विविधान् ग्रन्थान् मनोरमान् व्यलिखन्
दादा कुण्डली रूपं-गीता रूपं-पुनश्चकार कुण्डली वद्धम्

४. नूरपुरी शतकं च पुनराख्यानं समागते वर्षे
हिमगिरि दशकशतीं च संस्कृत वाण्यां पुनर्जगाद दादा स

५. षड् भाषानां वक्ता एकोत्तर सप्तति तमे वर्षे लिखति
कल्पद्रुम सम्पादन रक्तः विविधाः विद्याः समाधने तत्र

६. पंचागत पत्रेषु देशे प्रान्ते च मुद्रितो दादा
काव्यं कुंजं विलिखेद् गुरु शिष्यानां मनोहराः वार्ताः

७. व्यङ्ग्यानां वाणैः सं छिन्नं भिन्नं करोति परनिन्दकं
आह्लादयति च पुनः नैरेवेषुभि निजानि मित्राणि

८. व्रज भूम्याभनुरक्तः कृष्ण दादारविन्द राग आसक्तः
राधा माधव-युगलं-ध्यायान्-भ्रमति जगद्विभ्रम विरक्तः ।

× × × × × ×

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 1269
Date
SIMLA.

Library IIAS, Shimla
S 954 Sh 24 H
G 1262